अयं विवाह प्रकाशः

श्रीरणवीर पाठशाला मुख्याध्यापक दयाद्यनेक गुण विभूषित श्रीमतां १०८ गङ्गाधर
शर्म्मणां शिष्येण श्री १०८ चन्द्रमौल्यात्मज समस्त ब्राह्मण कुल दयेच्छु
नित्यानन्द शर्म्मणा संगृहितः
च
श्रीगंगाधर शर्म्मणां सुतेन विद्यारत्न स्मृतिरत्न शास्त्र्याद्युपाधि युक्तेन देवराजेन संशोधितः
तथा
श्री जम्बू कश्मीर तिब्बतादि देशाधिपति जी. सी. ऐस. आई., जी. सी. आई. ई.,
एल. एल. डी., इत्युपाधि युक्तानां श्रीमतां १०८
महाराज प्रताप सिंह
वर्म्मणामाज्ञया पण्डित गङ्गा राम बी. ए. इत्युपाधि युक्तेन श्रीरणवीर
प्रकाश यन्त्रालये धर्मार्थं वितरणार्थमुद्रापितः

सम्वत् १९८१—७००

Sri Pratap Singh
Public Library
Srinagar.

6085

Price R: /8/—

418
A358

9.1.26. [illegible] for [illegible] No. 8215 [illegible]

418

श्री गणेशाय नमः ।

अथ शकुन विधिः ।

शुभगा प्रक्षालित पाणिपादा आचम्य सिंधूर तिलकं दूर्वा पवित्रं च धृत्वा सूर्य्यादिकं पूजयेत् अद्येत्यादि अमुक गोत्रस्य बालस्य वा अमुक गोत्रायाः कन्यायाः कर्तव्य विवाह पूर्वांगतया दलन कंडनेंधन चयनादिकं शकुन विधौ गणपत्यादि पूजनं च करिष्ये देवता पूजनं कृत्वा अद्येत्यादि अमुक गोत्रस्य बालस्य वा अमुक गोत्रायाः कन्यायाः विवाहे निर्विघ्नता सिद्धये समस्त ग्रह कुल देवता प्रीतये च इदं गोधूमान्न माष गुड स्विन्न चणक मंगल सूत्रादिकं प्रजापति दैवताकं अमुक गोत्राभ्यां पुरोहिताचार्य्याभ्यां संप्रददे ततः समिधादिकं कुर्य्यात् अद्येत्यादि अमुक गोत्रस्य बालस्य वा कन्याया विवाह पूर्वांग शकुन कर्म्म सिध्यर्थं इदं रजतं चन्द्र दैवताकं ताम्रं सूर्य्य दैवताकं आचार्य्याय संप्रददे सौभाग्यवती तिलकं सूर्य्यादि पूजनं कृत्वा अद्येत्यादि

अमुक गोत्रस्य बालस्य वा अमुक गोत्रायाः कन्याया विवाहांगत्वेन लघु कडाह कर्माणि गणपत्यादि पूजनं करिष्ये पूजनं कृत्वा अद्येत्यादि अमुक गोत्रस्य वालस्य वा अमुक गोत्रायाः कन्यायाः कर्तव्य विवाहाख्य कर्म्मणि निर्विघ्न सिद्धये लघु कडाह कर्म्माणि नवग्रह कुल देवता प्रीतये इमानि गुड स्विन्न चणक घृत तैल तण्डुलादीनि आचार्य्य कुल पुरोहिताभ्यां संप्रददे कडाहे तैलादिकं दत्वा अद्येत्यादि अमुक गोत्रस्य वालस्य वा अमुक गोत्रायाः कन्यायाः विवाहांग लघु कडाह स्थापन प्रतिष्ठा सिद्धये रजतं चन्द्र दैवताकं ताम्रं सूर्य्य दैवताकं यथा गोत्रायाचार्य्याय संप्रददे ॥

418
A358

ओं श्रीविघ्नहर्त्रे नमः ।

अथ पुण्याह वाचनम् ।

शुचिराचान्तः सपवित्र पाणिः धृत तिलको यजमानः प्राणानाऽऽयम्य सुमुखश्चेत्यादि गणपत्यादीन्नमस्कृत्य कुश यव कुसुम सहितं जलमर्घ पात्रे कृत्वा प्रतिज्ञा संकल्पं कुर्यात् ।

हरिः ओं तत्सदद्येत्यादि देशकालौ संकीर्त्य करिष्यमाणाऽमुक कर्मणो निर्विघ्नता सिद्ध्येऽमुक कर्माङ्गत्वेन च पुण्याह वाचनं करिष्ये । तद्यथा *प्रणवस्य ब्रह्मा ऋषिर्दैवी गायत्री छन्दः परमात्मा देवता प्रतिमनामादौ विनियोगः ॥

---

*अग्नि पुराणे २१५ अध्याये —सर्व मन्त्र प्रयोगेषु प्रणवः प्रथमः स्मृतः ।
तेनसम्परिपूर्णं यत्तत्पूर्णं कर्म नेतरत् ॥

आपस्तम्बः— तस्मादोमित्युदाहृत्य यज्ञ दान तपः क्रियाः ॥ कर्तव्याः ॥

तत्राष्टौ तंडुले रष्टदलं कृत्वा महीद्यौरिति मन्त्रस्य मेधा तिथिः ऋषिः गायत्री छन्दः द्यावा पृथिवी देवता भूमिस्पर्शने विनियोगः । ओं महीद्यौः पृथिवी चनऽइमं यज्ञ मिमिक्षिताम् पिपृतान्नोभरीमभीः । इति भूमिं स्पृष्ट्वा । ओषधय इति मन्त्रस्य अथर्व पुत्र भिषगृषिः अनुष्टुब्छन्दः ओषधि र्देवता यव प्रक्षेपणे विनियोगः । आ ओषधयः समवदन्त सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्त ँ राजन् पारयामसि । इत्यनेनाऽष्ट दलोपरि यवान् प्रक्षिप्य आजिघ्र कलशेति मन्त्रस्य कुसुरु विंद ऋषिः महा पक्ति छन्दः आपो देवता कलश स्थापने विनियोगः । ओं आजिघ्र कलशं मह्यात्वा विशन्त्विन्दवः पुनरूर्ज्जा निवर्त स्वमानः सहस्रं धुक्ष्वो रुधारा पयस्वतीः पुनर्म्मा विशता द्रयिः । इत्यष्ट दलोपरि कलशं निधाय । वरुणस्यो त्तम्भन मिति मन्त्रस्य विवस्वान् ऋषिः यजुः वरुणो देवता जल पूरणे विनियोगः । ओं वरुणस्यो त्तम्भनमसि ऽवरुणस्य स्कम्भन सर्ज्जनीस्थो ऽवरुणस्यऽऋत सदन्न्यसि वरुणस्यऽऋत सदनमसि ऽवरुणस्यऽऋत सदनमासीद । इति कलशं जलेनाऽपूर्य । त्वांगन्धर्वा ऽअखनमिति मन्त्रस्य विवस्वानृषि रनुष्टुप् छन्दः सोमो देवता गन्धप्रक्षेपे विनियोगः । ओं त्वांगन्धर्वाऽअखनं स्त्वा मिन्द्रस्त्वां बृहस्पतिः । त्वामोषधे सोमोराजा विद्वान्न्य क्ष्माद मुच्यत । इति कलशे गन्धप्रक्षेपः । या ओषधिरिति मन्त्रस्य अथर्व पुत्रभिषगृषिः

ओषधि देवता ओषधिप्रक्षेपे विनियोगः । ओं याओषधीः पूर्वा जाता देवेभ्य स्त्रियुगं पुरा मनैनु बभ्रूणामह ँ शत धामानि सप्तच । इति सर्वौषधीः । काण्डा दिति अग्निऋषिरनुष्टुप छन्दो दूर्वेष्टका देवता दूर्वा प्रक्षेपे विनियोगः । ओं काण्डात्कण्डात्प्ररो हन्ती परुषः परुषस्परि एवानो दूर्वे प्रतनु सहस्रेण शतेनच । इति दूर्वा प्रक्षेपः । अश्वत्थव इति मन्त्रस्य आथर्वण ऋषिः अनुष्टुब्छन्दः भिषगोषधयो देवता पंचपल्लव प्रक्षेपे विनियोगः ओं अश्वत्थेवो निषदनं पर्णेवो वसतिष्कृता गोभाजऽ इत्किला सथ यत्स नवथ पूरुषम् । इति *पञ्चपल्लवान् । स्योना पृथिवीति मन्त्रस्य मेधातिथि ऋषि गायत्री छन्दः पृथिवी देवता मृत्तिका प्रक्षेपे विनियोगः । ओं स्योना पृथिवी भवानृक्षरा निवेशनी यच्छानः शर्म सप्रथाः अयनः शोशुच दघम् । इति सप्तमृदः । याः फलिनी रित्यस्य आथर्वण ऋषिः अनुष्टुप्छन्दः भिषगोषधया देवता फल प्रक्षेपे विनियोगः । आ या फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पति प्रसूतास्तानो मुञ्चत्व ँ हसः । इति पूगी फलम् । परि वाजपतिरिति साम ऋषि गायत्री छन्दः अग्निर्देवता पञ्चरत्न प्रक्षेपणे विनियोगः । ओं परि वाजपतिः कविरग्निर्हव्या न्यक्रमीत् दधद्रत्नानि दाशुषे ।

---

*अश्वत्थोदुम्बर प्लक्ष चूतन्यग्रोध पल्लवाः ।
पञ्च पल्लव मित्युक्तं सर्व कर्मणि शोभनम् ॥ ब्रह्म पुरा०

इति पञ्चरत्नानि । हिरण्यगर्भ इत्यस्य हिरण्यगर्भ ऋषि स्त्रिष्टुब्छन्दः प्रजापति र्देवता हिरण्य प्रक्षेपे विनियोगः । ओं हिरण्यगर्भः सम वर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषाऽविधेम । इति हिरण्यम् । युवासुवासेति विश्वामित्र ऋषि स्त्रिष्टुब्छन्दः सूर्या देवता वस्त्र परिधाने विनियोगः । ओं युवासुवासाः परिवीतऽआगात् सऽउश्रेयान् भवति जायमानः । तन्धीरासः कवयऽउन्नयन्ति स्वाध्यो मनसः देवयन्तः । इति रक्तवस्त्रम । पूर्णा दर्वीति विवस्वान् ऋषिः अनुष्टुब्छन्दः इन्द्रा देवता कलशो परिधान्य पूरित पात्र न्यासे विनियोगः । ओं पूर्णा दार्व्वि परा पत सुपूर्णा पुनरापत । वस्ने वविक्रीणावहाऽइष मूर्ज ँ शतक्रतो । इति धान्य पूर्ण पात्रम् । तत्वायामीति शुनः शेफ ऋषि स्त्रिष्टुब्छन्दः वरुणो देवता वरुणावाहने विनियोगः । ओंतत्वायामि ब्रह्मणा वन्दमान स्तदा शास्ते यजमानो हविर्भिः । अहेडमानो वरुणो हवो ध्युरुश ँ समानऽआयुः प्रमोषीः । इति वरुण मावाह्य । मनोजूतिरिति । ओं मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञ मिमंतनो त्वरिष्ट ँ समिमं दधातु । विश्वे देवासऽइहमाद यन्तामो प्रतिष्ठ । इति मन्त्रेण वरुणं कलशे प्रतिष्ठाप्य अस्मिन् कलशे वरुणः सुप्रतिष्ठितो वरदो भवतु । ततोऽक्षतैः देवाना वाहयेत् । कलाः कलाहि देवानां दानवानां कलाः कला विगृह्यानि र्मितो येन कलशस्ते नकथ्यते ।

कलशस्य मुखे विष्णु र्ग्रीवा यान्तु महेश्वरः। मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥ कुक्षौतु सागराः सप्त सप्त द्वीपावसुन्धरा । अर्जुनी गोमतीचैव चन्द्रभागा सरस्वती॥ कावेरी वृद्ध वेणा च गङ्गाचैव महानदी । तापी गोदावरी चैव माहेन्द्री नर्मदा तथा ॥ नदाश्च विविधा जाता नद्यः सर्वास्तथा पराः। पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै ॥ शान्ति पुष्टिश्च गायत्री सावित्री कलशे स्थिता । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः। अङ्गैश्च सहिताः ह्येते कलशन्तु समाश्रिताः ॥ सर्वे समुद्राः सरितः सरांसि सजलानिच। आयान्तु मम शान्त्यर्थं दुरितक्षय कारकाः ॥ आवाहितेभ्यो कलशस्थ देवेभ्यो नमः पादयोः पाद्यम् हस्तयो रर्घ्यम् स्नानीयम् अनुलेपनम् अक्षताः पुष्पाणि धूपोदीपश्च नैवेद्यम् दाक्षिणाद्रव्यम् इति सम्पूज्य प्रार्थयेत्—देवदानव सम्वादे मथ्यमानो महो दधौ । उत्पन्नोऽसितदाकुम्भ विधृतो विष्णुना स्वयम् । त्वत्तो ये सर्व तीर्थानि देवाः सर्वे त्वयिस्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः । शिवः स्वयं त्वमेवासि विष्णु स्त्वञ्च प्रजापतिः । आदित्याः वसवोरुद्राः विश्वेदेवाः सपैतृकाः । त्वयि तिष्ठन्ति सर्वेऽपि यतः काम फलप्रदः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव। सान्निध्यं कुरुमेदेव प्रसन्नो भव सर्वदा॥ इति प्रार्थ्य पुण्याह वाचकेभ्यो वेद विद्भ्यो नमः—इति विप्रान् गन्धादिभिः सम्पूज्य वरण चतुष्टय द्रव्य मादाय हरिः ओं तत्सदद्येत्यादि अमुकोऽहं करिष्यमाणाऽमुक कर्माङ्गत्वेन पुण्याह

वाचनार्थं एभिर्वरण द्रव्यैः युष्मान् ऋग् यजुः सामाऽथर्व विदो विप्रानहं वृणे। वृताः स्मः प्रतिवचनम्॥ व्रतेन दीक्षा माप्नोति दीक्षयाप्नोति दक्षिणाम्। दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्य माप्यते॥ ततो यजमानोऽवनि कृत जानु मण्डलः कमल मुकुल सदृश मञ्जलिं शिरस्याधाय तत्र लमेव कलशं धारयित्वाऽऽशिषं प्रार्थयेत् ओं दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णु पदानिच ओंत्रीणि पदाविचक्रमे विष्णुर्गोपाऽअदाभ्यः अतो धर्माणि धारयन् तेनाऽऽयुः प्रमाणेन पुण्यं पुण्याहं दीर्घ मायुरस्तु ३॥ पुण्याहवाचकाश्च अस्तु दीर्घमायुः इति त्रिः प्रति ब्रूयुः। ततः शिवाः आपः सन्तु इत्यनेन विप्राणां हस्ते यजमानो जलं दद्यात् सन्तु शिवाः आपः इति विप्राः प्रति ब्रूयुः सौमनस्य मस्तु। इति पुष्प दानम् अस्तु सौमनस्यम् इति प्रति वचनम् अक्षतं चारिष्टंचास्तु इत्यक्षतान् अस्त्वक्षतमरिष्टञ्च। इति प्रति वचनम्। गन्धाः पान्तु इति गन्धेनार्चनम्। सुमङ्गल्यञ्चास्तु। प्रति वचनम्। ओंअक्षताः पान्तु। आयुष्यमस्तु प्रति०। ओं पुष्पाणि पान्तु। सौश्रिय मस्तु प्रति०। ओंताम्बूलानिपान्तु। ऐश्वर्यमस्तु प्रति०। ओं दक्षिणाः पान्तु। बहुदेयं चास्तु प्रति० दीर्घमायुः शान्तिः पुष्टि स्तुष्टिः श्री यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनञ्चायुष्यं चास्तु यंकृत्वा सर्व वेद यज्ञ क्रिया करण कर्माऽरम्भाः शुभाः शोभनाः प्रवर्तन्ते तमहमोंकार मादिं कृत्वा ऋग्यजुः सामाथर्वाऽऽशीर्वचनं बहु ऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये इति यजमानः वाच्यतामिति विप्राः॥ ओंद्रविणोदाः

द्राविण सस्तुरस्य द्राविणोदाः सनरस्य प्रयंसत् । द्राविणोदाः वीरवती मिषन्नो द्राविणोदाराः सते दीर्घं मायुः ॥ १ ॥ सविता पश्चात्तात् सविता पुरस्तात् सवितोत्तरात्तात् सविता धरात्तात् । सवितानः सुवतु सर्व तातिं सवितानो रासतां दीर्घमायुः ॥ २ ॥ नवो नवो भवाति जायमानो न्हांके तुरुषसामे त्यग्रम् । भागं देवेभ्यो विदधात्यायन्प्रचन्द्रमा स्तिरते दीर्घमायुः ॥ ३ ॥ उच्चादि विदक्षिणावन्तो अस्थुर ये अश्वदाः सहते सूर्येण । हिरण्यदा अमृतत्वं भजन्ते दासोदाः सोम प्रतिरन्त आयुः ॥ ४ ॥ इति ऋग्वेदिनः ॥ हरिः ओम् द्रविणोदाः पिपीषति जुहोत प्रचतिष्ठत । नेष्ट्रादृतुभिरिष्यत ॥ १ ॥ सवितात्वा सवाना ँ सुवता मग्निर्गृहपतीना ँ सोमोऽवनस्पतीनाम् । बृहस्पति ऽर्वाच ऽइद्रो ज्यैष्ठयाय रुद्रः पशुभ्यो मित्रः सत्योऽवरुणो धर्म्मं पतीनाम् ॥ २ ॥ ओं नतद्रक्षा ँ सि नपिशाचास्तरन्ति देवाना मोजः प्रथम ज ँ ह्येतत् । यो बिभर्ति दाक्षायण ँ हिरण्य ँ सदेवेषु कृणुते दीर्घमायुः समनुष्येषु कृणुते दीर्घ मायुः ॥ ३ ॥ उच्चाते जात मन्धसो दिविसद्भूम्याददे । उग्र ँ शर्म्म महिश्रवः ॥ ४ ॥ उपास्मै गायतानरः पवमानायेन्दवे । अभिदेवाँ ँ ऽइयक्षते ॥ ५ ॥ इति यजुर्वेदिनः ॥ उच्चाता३यिजात मन्धसाः । दिवाइसा ऽभूमियार२३ ददायि । उग्रा ँ शर्म्मा । महार२३यिश्रवाउ३स्तौषे२३४५ उपा५स्मै । गा३या३तानाराः । पा३वामा३ना । यार२३आहुम्माइ । दा२३वायी आभिदेवा ँ ३ इया २ क्षता उ । वा ३४५ अदनो देव सवितः २५ औहोवा । इह श्रुधाई प्रजावार२३न्सावीः सौभगाम् । परादू२३

इवा३होवा३हा । प्निय ँ सू २३४५ वा ६५६ दक्षा३या२३४चन्द्रमा आउवा प्नूवान्ता राउवा । सुपर्णो धाउवा । वतेदिवि । नमोहि राउवा । रायना इमाया उवा । पदं विन्दा उवा । तिविद्युताः । वित्तम्मा आउवा । स्यरोदा २३ सा३४३यि । उँ२३४५ई । डा । देवोवो ३द्रविणोदाः । पूर्णां विवष्टासिचं । ऊद्वा१सिंचा२ । ध्वमुपवा पृणध्वं आदिद्वो दे २३वऔहते । इडाभा२३ । ओई २३४५ ईडा । इति सामवेदिनः ॥ ॐधातारातिः सवितेदं जुषन्तां प्रजापति र्निधिपति र्नोआग्निः ॥ त्वष्टा विष्णुः प्रजया संरराणो यजमानाय द्रविणं दधातु ॥ १ ॥ येन देवं सवितारं परिदेवा अधारयन् । तेनेदंब्रह्मणस्पते परिराष्ट्रायधत्तन।२। अहोरात्राभ्यां नक्षत्रेभ्यः सूर्य्याचन्द्रमसाभ्याम् । भद्राहमस्मभ्यं राजन्छकधूमत्वंकृधि॥३॥ उच्चापतंतं मरुणं सुपर्णं मध्ये दिवस्तरणिंभ्राजमानम् । पश्यामत्वा सवितारं यमाहुरजस्रं ज्योतिर्यदाविंददात्रिः ॥ ४ ॥ ततो यजमानः व्रत जप नियम तपः स्वाध्याय क्रतुदम दया दान विशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् । विप्राश्च समाहितमनसः स्मः । प्रतिब्रूयुः । यजमानः प्रसीदन्तु भवन्तु भवन्तः । प्रसन्नाः स्मः विप्राः । ततो यजमानः पूर्वोक्त रीत्याऽवनि कृतजानु मण्डलः कमल मुकुल सदृश मञ्जलिं शिरस्याधाय तत्र तमेव कलशं धारयित्वा कलश जलं अन्यस्मिन् पात्रे वक्षमाण प्रकारेण प्रतिवचने दद्यात् । ॐ शान्तिरस्तु । ॐ पुष्टिरस्तु । ॐ तुष्टिरस्तु । ॐ वृद्धिरस्तु । ॐ अविघ्नमस्तु । ॐ आयुष्यमस्तु । ॐ आरोग्यमस्तु । ॐ शिवं कर्मास्तु । ॐ कर्म

समृद्धिरस्तु । ॐ धर्म समृद्धिरस्तु । ॐ वेद समृद्धिरस्तु । ॐ शास्त्र समृद्धिरस्तु । ॐ धनधान्य समृद्धिरस्तु । ॐ पुत्रपौत्र समृद्धिरस्तु । ॐ इष्टसम्पदस्तु । ततो जलं वहिर्देशे अनिष्ट निरसनमस्तु । यत्पापं तत्प्रतिहतमस्तु । पुनः पात्रे ॐ यच्छ्रेय स्तदस्तु । उत्तरे कर्मण्य विघ्नमस्तु । ॐ उत्तरोत्तरं अहरहः अभिवृद्धिरस्तु । ओं उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यताम् ॥ ओं इष्टाकामाः सम्पद्यताम् । ओं तिथिकरणमुहूर्त नक्षत्र ग्रहलग्न सम्पदस्तु । ओं तिथि करण मुहूर्त नक्षत्र ग्रहलग्नाधि देवताः प्रीयताम् । ओं तिथि करणे समुहूर्त्ते सनक्षत्रे सग्रहे सलग्ने साधिदेवते प्रीयेताम् । ओं दुर्गापञ्चाल्यौ प्रीयेताम् । ओं अग्नि पुरोगाः विश्वेदेवाः प्रीयन्ताम् । ओं इन्द्र पुरोगाः मरुद्गणाः प्रीयन्ताम् । ओं माहेश्वरी पुरोगाः उमा मातरः प्रीयन्ताम् । ओं वसिष्ठ पुरोगाः ऋषि गणाः प्रीयन्ताम् । ओं अरुन्धति पुरोगाः एकपत्न्यः प्रीयन्ताम् । ओं ऋषयः छन्दांस्याचार्या वेदा देवा यज्ञाश्च प्रीयन्ताम् । ओं विष्णु पुरोगाः सर्वे देवाः प्रीयन्ताम् । ओं ब्रह्म पुरोगाः सर्वे वेदाः प्रीयन्ताम् । ओं ब्रह्मच ब्राह्मणाश्च प्रीयन्ताम् । ओं श्रीसरस्वत्यौ प्रीयेताम् । ओं श्रद्धामेधे प्रीयेताम् । ओं भगवती कात्यायनी प्रीयताम् । ओं भगवती माहेश्वरी प्रीयताम् । ओं भगवती ऋद्धिकरी प्रीयताम् । ओं भगवती सिद्धिकरी प्रीयताम् । ओं भगवती वृद्धिकरी प्रीयताम् । ओं भगवती पुष्टिकरी प्रीयताम् । ओं भगवती तुष्टिकरी प्रीयताम् । ओं भगवन्तौ विघ्न विनायकौ प्रीयेताम् । ओं भगवान्

स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः प्रीयताम् । ओं हरिहर हिरण्यगर्भाः प्रीयन्ताम् । ओं सर्वाः कुल देवताः प्रीयन्ताम् । ओं सर्वा ग्राम देवताः प्रीयन्ताम् । ओं सर्वाः वास्तु देवताः प्रीयन्ताम् । ओं सर्वा इष्ट देवताः प्रीयन्ताम् । ततो जल बहिर्देशे हत श्चब्रह्मद्विषः । हताश्चपरिपन्थिनः । हताश्चास्य कर्मणो विघ्नकर्तारः । शत्रवः पराभवं यान्तु शाम्यन्तु घोराणि । शाम्यन्तु पापानि । शाम्यन्त्वीतयः । पुनः पात्रे ओं शुभानि वर्द्धन्ताम् । ओं शिवा आपः सन्तु । ओं शिवा ऋतवः सन्तु । ओं शिवा ओषधयः सन्तु । ओं शिवा वनस्पतयः सन्तु । ओं शिवाः नद्यः सन्तु । ओं शिवा गिरयः सन्तु । ओं शिवा अतिथयः सन्तु । ओं शिवा अग्नयः सन्तु । ओं शिवा आहुतयः सन्तु । ओं अहोरात्रे शिवेस्याताम् । ओं शं वः कनिक्र दद्वः पर्जन्यो अभिवर्षत्वोषधयः प्रतिधीयताम् । शन्नो द्यावा पृथिवी शं प्रजाभ्यः शन्नो अस्तु द्विपदे शं चतुष्पदे ॥ १ ॥ इति ऋग्वेदिनः ॥ ओं आब्रह्मन् ब्राह्मणो ऽब्रह्मवर्च्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषु ऽव्यात ऽव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढा नड्वानाशुः सप्तिः पुरन्धि र्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्यऽवीरो जायतां न्निकामे निकामेनः पर्ज्जन्न्यो वर्षतु फल वत्यानऽओषधयः पच्चयन्तां योगक्षेमोनः कल्पताम् ॥ १ ॥ इति यजुर्वेदिनः ॥ त्वष्टा ३४ नोदेवियम् । वचा पर्जन्यो ब्राह्मणस्प २३तीः ॥ पुत्रैर्भ्रातृभि रदितिर्नुपातु २३ जाः दुष्टारा २३ त्रा मणवा २३ चा ३४ इः । उं २३४५ ई । डा २० ॥ इति साम

वेदिनः ॥ गणास्त्वोप गायन्तु मारुताः पर्जन्य घोषिणः पृथक् । सर्गा वर्षस्य वर्षतो वर्षन्तु पृथिवी मनु ॥ इत्यथर्ववेदिनः ॥ ततो यजमानः शुक्राङ्गारक बुधबृहस्पति शनैश्चर राहु केतु सहिता आदित्य पुरोगाः सर्वे ग्रहाः प्रीयन्ताम् ॥ ओं भगवन्नारायणः प्रीयताम् । ओं भगवान्पर्जन्यः प्रीयताम् । ओं भगवान् स्वामी महासेनः प्रीयताम् । ओं पुरोनुवाक्ययायत्पुण्यं तदस्तु । याज्यया यत्पुण्यं तदस्तु । वषट्कारेण यत्पुण्यं तदस्तु । प्रातः सूर्योदये यत्पुण्यं तदस्तु । एतत्कल्याण प्रयुक्तं पुण्यं पुण्याहं वाचयिष्ये । विप्राः वाच्यताम् । यजमानः ब्राह्मयं पुण्यं महद्यच्च सृष्ट्युत्पादन कारकम् । वेद वृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः । भोब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे करिष्यमाणाऽमुक कर्मणः पुण्याहं भवन्तो ब्रुवन्तु इति त्रिब्रूयात् । तथैव विप्राः पुण्याहं त्रिब्रूयुः । उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि । वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमावद विश्वतोनः शकुने पुण्यमावद ॥ इति ऋग्वेदिनः ॥ ओँ पुनन्तु मादेवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहिमा ॥ इति यजुर्वेदिनः ॥ ओं पुनानः सोमा ३ धारा २३४ या आपो वसानो अर्षस्या रत्नधायोनि मृतस्य सायिदसाइ औहा ३ उवा । उत्सोदेवाहिरा २३ हाइ । उंहा ३ उवा राययो उं ३ होवाहो ५३ डा ॥ इति सामगाः ॥ ओं पुनन्तुमा देवजनाः पुनन्तु मनवोधिया । पुनन्तु विश्वा भूतानि जातवेदः पुनातुमा ॥ इत्यथर्व वेदिनः ॥

ततो यजमानः पृथिव्या मुद्धृतायान्तु यत्कल्याणं पुराकृतम्। ऋषिभिः सिद्ध गन्धर्वै स्तत्कल्याणं ब्रुवन्तुनः। भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुक कर्मणः कल्याणं भवन्तोब्रुवन्तु इति त्रिर्ब्रूयात् अस्तु कल्याण मिति विप्राः त्रिः प्रतिब्रूयुः॥ ओं अपाः सोम मस्त मिन्द्र प्रयाहि कल्याणी र्जायासुरणं गृहेते। यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत्॥ इति ऋग्वेदिनः॥ ओं यथेमां वाचं कल्याणी मावदानि जनभ्यः ब्रह्मराजन्याभ्या ँ शूद्रायचार्याय चस्वाय चारणायच। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मे कामः समृध्यता मुपमादोनमतु॥ इति यजुर्वेदिनः॥ का५या। नश्चा३यित्रा ३ आभुवात्। ऊतासिदावृधः सखाउ २ हो हायि कया २३ शचा ३ इष्टयौहो ३ हुम्मा २। वा २ र्तों ३५ हायि ३॥ इति सामवेदिनः॥ ओं विश्व जित्कल्याण्यै मापरिधेहि कल्याणिद्विपाच्चसर्वं नोरक्ष चतुष्पाद्यच्चनस्वम्। इत्यथर्ववेदिनः॥ ततो यजमानः सागरस्यतु याऋद्धिर्महालक्ष्म्यादिभिः कृता। सम्पूर्णा सुप्रभावाच तां ऋद्धिन्तु ब्रुवन्तुनः॥ भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुक कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु। इति वारत्रयं ब्रूयात्। ऋध्यता मिति विप्राः त्रिः प्रतिब्रूयुः। ओं ऋध्याम स्तोमं सनुयामवाजमानो मंत्रं सरथे होपयातम्। यशोन पक्वं मधुगोष्वन्तरा भूतांशो अश्विनो काममप्राः॥ इति ऋग्वेदिनः॥ ओं सत्रस्य ऋद्धिरस्य गन्मज्ज्योति रमृता ऽअभूम। दिवं पृथिव्या ऽअध्यारुहामा विदामदेवान्त्स्वज्ज्योतिः॥

इति यजुर्वेदिनः ॥ अहोवा २७५ हो ३ वा अगन्मज्ज्योतिः २ अगन्मज्योतिः ॥ २ ॥ अमृता अभूम २ अमृता अभूम ३ न्तारिक्षं पृथिव्या अध्यारुहामान्तरिक्षं पृथिव्या अध्यारुहामा ३ दिवमन्तरिक्षा दध्यारुहामा ३ । अविदाम देवान् ३ ॥ समुदेवै रगन्महि ३ औहोवा २ औहोवा ३ सुवर्ज्योती २३४५ ॥ इति सामवेदिनः ॥ ऋधूङ्मन्त्रो योनिं य आवभूवामृता सुर्वर्धमानः सुजन्मा । अदब्धासु भ्राजमानो हेवत्रितो धर्त्ता धारत्रीणि ॥ इत्यथर्ववेदिनः ॥ ततो यजमानः स्वस्तिर्या अविनाशाख्या पुण्यकल्याण बृद्धिदा । विनायक प्रिया नित्यं तांच स्वस्तिं ब्रवन्तुनः । भो ब्राह्मणाः मम सकुटुम्बस्य सपरिवारस्य गृहे अमुक कर्मणः स्वस्तिं भवन्तो ब्रुवन्तु इति त्रिर्ब्रूयात् । स्वस्ति विप्राः त्रिः ओं स्वस्ति ऋद्धि प्रथये श्रेष्ठारे वण स्वत्यभिया वाममेति । सानो अमात्यो अरणे निपातु स्वावेशा भवतु देवगोपा ॥ इति ऋग्वेदिनः ॥ ओं स्वस्ति न ऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्यों अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ इति यजुर्वेदिनः । ओं त्रातार मिन्द्र मवितारमिं २३ द्राम् । हवे हवे सुहवां शूर मिं २ इंद्राम् । हुवायिनु शक्रं पुरूहू । तमीं २ इद्राम् । इदां होवायि मघवा । वा २३४ यि । सू ३ वा ५ यिंद्रा ३५३ ॥ इति सामवेदिनः ॥ ओं स्वास्ति मात्र उत पित्रेणो अस्तु स्वास्ति गोभ्यो जगते पुरुषेभ्यः विश्वं सम्भूतं सुविदत्तं नो अस्तु ज्योगेव दृशेम सूर्यम् ॥ इत्यथर्ववेदिनः ॥ ततो यजमानः मृकंडुसूनो रायुर्यद्ध्रुव लोमशयोस्तथा । आयुषातेन संयुक्ताः जीवेम शरदः

शतम्। इति त्रिः। विप्राः शतं जीवन्तु भवन्तः इति विप्राः त्रिः प्रतिब्रूयुः। ओं शतं जीव शरदो वर्धमानः शतं हेमन्तां छतमुव सन्तान्। शत मिन्द्र ग्नेः सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः॥ इति ऋग्वेदिनः॥ ओं शतमिन्नु शरदोऽअन्ति देवा यत्रानश्च क्रा जरसन्तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मानो माद्धयारी रिषतायुर्गन्तोः॥ इति यजुर्वेदिनः॥ ओं आयुर्विश्वायु र्विश्वं विश्वमायुराशिमहि प्रजां त्वष्टराधि निधे ह्यस्मेः शतं जीवम शरदो वयन्ते २३४५॥ इति सामवेदिनः॥ ओं आयुरस्मै धेहि जातवेदः प्रजांत्वष्ट रधि निधे ह्यस्मै। रायस्पोषं सवितरा सुवास्मै शतंजीवाति शरदस्तवायम्॥ इत्यथर्ववेदिनः॥ ततो यजमानः शिव गौरी विवाहे या श्रीरामे या नृपात्मजे। धनदस्य गृहे याश्रीः रस्माकं सास्तु सद्मानि। इति त्रिः। अस्तु श्री इति त्रिर्विप्रः। ओं श्रिये जातः श्रिय आनि रियाय श्रियं वयो जरितृभ्यो दधाति। श्रियं वसाना अमृतत्व मायन् भवन्ति सत्याः समिथा मितद्रौ॥ इति ऋग्वेदिनः॥ ओं मनसः काममाकूतिं वाचः सत्यमशीय। पशूनाँ रूपमन्नस्य रसो यशः श्रीः श्रयतान्मयि स्वाहा॥ इति यजुर्वेदिनः॥ श्रायन्त इवसू ऽ४गयाम। विश्वा राये दिंद्रा २। स्यभां रक्षाता। वासुनि जातो जनिमा। नियोजा। सा २ प्रतिभागं नदी २ धिमः। प्रा २३ ती। भागां ना ३ दाहुम्। धीमा ३। ५२३४ ओवाश्रिये॥ इति सामगाः॥ ओं एहयातु वरुणः सोमो अग्निर्बृहस्पति वसुभि रेह यातु। अस्य श्रिय मुपसंयात सर्वं उग्रस्य चेतुः संमनसः सजाताः॥ इत्यथर्ववेदिनः॥

ततो यजमानः प्रजापतिर्लोकपालो धाता ब्रह्माच देवराट् । भगवान् शाश्वतो नित्यं नो रक्षतुच सर्वतः । भगवान् प्रजापतिः प्रीयताम् । इत्युदक त्यागः । ॐ प्रजापते नत्वदेता न्यन्यो विश्वाजातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥ इति ऋग्वेदिनः ॥ ॐ प्रजापते नत्वदेता न्यन्न्यो विश्वारूपाणि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो ऽअस्तुवय ँ् स्याम पतयो रयीणाम् ॥ इति यजुर्वेदिनः ॥ हा उ ३ । इमाः ३ । प्रजाः ३ । प्रजापते होई २ । प्रजापते हा ३१ ऊवा ३१ एहृदयम् २ ए । हृदया ३१ । उ । वा २ प्रजारूपमजियने ३ इट् इडा २३४५ इति साम वेदिनः ॥ ॐ प्रजापते रावृतो ब्रह्मणा वर्म्मणाहं कश्यपस्य ज्योतिषा वर्चसाच । जरदष्टिः कृतवीर्यो विहायाः सहस्रायुः सुकृतश्चरेयम् ॥ इत्यथर्व वेदिनः ॥ ततो यजमानः आयुष्मते स्वस्तिमते यजमानाय दायुषे । श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः । इति त्रिः । आयुष्मते स्वस्ति इति विप्राः त्रिः प्रतिब्रूयुः । ॐ स्वस्तये वायु मुपब्रुवा महै सोमं स्वस्ति भुवनस्य यस्पतिः । बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तुनः ॥ इति ऋग्वेदिनः ॥ ॐ प्रतिपन्था मपद्महि स्वस्ति गामनेहसम् । येन विश्वाः परिद्विषो वृणक्ति विन्दते वसु ॥ इति यजुर्वेदिनः ॥ त्यमुषू । वाजि । ना । ३४५म् देवजूता २३४ म् । सहोवानन्तारुता ३२ रंरथानाम् । अरिष्टना । २३४ । मिनिम् । पृतना ३४३ जमाशूम् । स्वस्त याई । तार्क्ष्या मीहा ३४३

हूवा ३५ यिमा ६५६ ॥ इति साम वेदिनः ॥ औं वेदः स्वस्ति द्रुघणः स्वस्तिः परशुर्वेदिः परशुर्नः स्वस्ति । हविष्कृतो यज्ञिया यज्ञकामास्ते देवासो यज्ञमिमं जुषंताम् ॥ इत्यथर्ववेदिनः ॥ ततो यजमानः यष्टव्य देवनाम चतुर्थ्यन्तं नमोन्तश्चोक्त्वा प्रीयतामिति कलश जलं अधः स्थित पात्रे पूर्ववत् क्षिपेत् । यजमानः ॐ स्वसित पुण्याह वाचन कर्म समृद्धिरस्तु । इति त्रिः । अस्तु इति विप्राः त्रिः प्रतिब्रूयुः । ततः *प्राङ्मुखस्थं †सस्त्रीकं पुत्रपौत्रादि यावत्परिवारयुतं यजमानं सदूर्वा दर्भ पल्लव पाणयो वेदपाठिनः । उदङ् मुखाः वक्ष्यमाण मन्त्रै कलश जलेनाऽ‡भिषिञ्चेयुः । $ॐ आपो हिष्ठामयोभुव स्तानऽऊर्ज्जे दधातन । महेरणाय चक्षसे ॥ १ ॥ पुनातु । योवः शिव तमो रसस्तस्य भाजयते हनः उशतीरिव मातरः ॥ २ ॥ पुनातु । तस्मा ऽरङ्गमा मवो यस्यक्षयाय जिन्वथ आपो जन यथाचनः ॥ ३ ॥ पुनातु । त्रातारमिन्द्र मवितार

---

* सर्वत्र प्राङ्मुखो दाता प्रति ग्राहीह्युदङ् मुख इत्युक्तेः ।

† सर्वेषु धर्मकार्येषु पत्नी दक्षिणतो भवेत् अभिषेके विप्र पाद क्षालने वामतो मता ।

‡ अत्राऽभिषेकं कुर्वाणो गो सहस्र फलं लभेत् इति वचनात कर्मान्ते शान्त्यर्थं अभिषेकं कर्म विधेयम् ।

$ आपोहिष्ठेत्यादि तिसृणां सिन्धु द्वीप ऋषिः गायत्री छन्द आपो देवता त्रातारमिंद्रति गर्ग ऋषिः गायत्रीछन्दो वरुणो देवता वरुणस्योत्तम्भन मिति मंत्रस्य विवस्वान् ऋषिः यजुः वरुणो देवता इदमाप इति मंत्रस्य विवस्वान् ऋषिः महा पंक्ति छन्दः आपो देवता पुनन्तुमा देवेति मन्त्रस्य विवस्वान् ऋषि रनुष्टुप् छन्दो अग्निर्देवता अभिषेके विनियोगः ॥

मिन्द्रꣳ हवे हवे सुहवꣳ शूर मिन्द्रम् । ह्वयामि शक्रं पुरुहूत मिन्द्रꣳ स्वस्ति नो मघवाधात्विन्द्रः ॥ ४ ॥ पुनातु । वरुणस्योत्तम्भन मसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्यऽऋत सदन्यसि वरुणस्य ऽऋत सदनमसि वरुणस्य ऽऋत सदन मासीद ॥५॥ पुनातु । इदमापः प्रवहता वद्यञ्च मलञ्चयत् । यच्चाभि दुद्रोहानृतं यच्च शेपे ऽअभीरुणम् । आपो मातस्मादेनसः पवनश्च मुञ्चतु ॥ ६ ॥ पुनातु । ॐ पुनन्तु मादेवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहिमा ॥ ७ ॥ पुनातु । ॐ सुरास्त्वा मभिषिञ्चन्तु ब्रह्मविष्णु महेश्वराः । वासुदेवो जगन्नाथ स्तथा सङ्कर्षणो विभुः । प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते । आखण्डलो ऽग्निर्भगवान् यमोवै निर्ऋतिस्तथा । वरुणः पवनश्चैव धनाध्यक्ष स्तथा शिवः । ब्रह्मणाः सहिताः सर्वे दिक्पालाः पान्तुते सदा । कीर्तिर्लक्ष्मी धृतिर्मेधा पुष्टि श्रद्धा क्रियामतिः । बुद्धिर्लज्जा वपुः शान्ति स्तुष्टिः कान्तिश्च मातरः । एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः । आदित्यश्चन्द्रमा भौमो बुधजीव सितार्कजाः । ग्रहास्त्वा माभिषिञ्चन्तु राहुकेतुश्च तर्पिताः । देव दानव गन्धर्वाः यक्ष राक्षस पन्नगाः । ऋषयो मुनयो गावो देव मातर एवच । देवपत्न्यो द्रुमाः नागाः दैत्याश्चाप्सरसां गणाः । अस्त्राणि सर्व शास्त्राणि राजानो वाहनानिच । औषधानिच रत्नानि कालस्याऽवयवाश्चये । सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एतेत्वा माभिषिञ्चन्तु सर्वकामार्थ सिद्धये । अन्नपते न्नस्य नोधेह्य नमीवस्य

शुष्मिणः । प्रप्रदातारं तारिष ऽऊर्जन्नो धेहि द्विपदे चतुष्पदे । ओं द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि । ओं यतो यतः समीहसे ततो नो ऽअभयं कुरु । शन्नः कुरु प्रजाभ्यो ऽभयन्नः पशुभ्यः पुनातु । ओं पालाशं भवति तेन ब्राह्मणो ऽभिषिञ्चति ब्रह्म वै पलाशो ब्रह्मणैवैन मेतद् भिषिञ्चति । अमृता ऽभिषेको ऽस्तु । ओं शान्तिः शान्तिः शान्तिः । ततः पुण्याहवाचकेभ्यो दक्षिणा दानम् । ओं अद्य तस्मिन् कृतैतत्पुण्याह वाचन कर्मणः पूर्णता सिद्ध्यर्थं इमां सुवर्ण रजतादिमयीं दक्षिणां सूर्य चन्द्र दैवतकां वा अमुकामुक गोत्रेभ्यः ऋग्यजुः सामाथर्व विद्भ्यो विप्रेभ्यो विभज्य सम्प्रददे नमम । तत आचार्याय दक्षिणा दानम् हरि ओं अद्यतस्मिन्कृतैतत् पुण्याहवाचन कर्मणः साङ्गुण्यता सिद्ध्ये इदं रजतादि द्रव्यममुक दैवतकं अमुक गोत्रायामुक शर्मणे आचार्याय तुभ्य सम्प्रददे नमम । तत आचार्य केसरादि युतं चन्दन मादाय यजमान मस्तके कुर्यात् गन्धद्वारां दुराधर्षां नित्य पुष्टां करीषिणीम् ईश्वरीं सर्व भूतानां तामिहोपह्वये श्रियम् । इति मन्त्रेण । तत आचार्यादयो वेद विदश्च पुष्प मालाऽक्षत पूगी फलानि चादायोत्थाय ओं पुनस्त्वादित्यारुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेनत्वं तन्वं वर्द्धयस्व सत्या सन्तु यजमानस्य कामाः । इत्यनेन मन्त्रेण सति सम्भवे श्रीसूक्तादि

नाच आशीर्वादं यजमानाय दद्युः । अथोदकसेकः अनेन शान्ति कर्मणा श्रीप्रजापतिः प्रीयताम् ॥

श्री १०८ सकल शास्त्र प्रवीण गांभीर्य्यैश्वर्य्यादि गुण सम्पन्नानां
श्री १०८ गंगाधर शर्म्मणां चरणैक निलयेन धनपुर निवासि
श्री पंडित वीणा प्रपौत्रेण श्री चन्द्रमौल्यात्मजेन बाल
ब्रह्मचारिणा नित्यानन्द शर्म्मणा संगृहीतं
पुण्याह वाचनं समाप्ति मगात् ॥

ॐ श्रीगणेशाय नमः ।

अथ *नान्दी श्राद्धम् ।

तत्रादौ कर्ता कृत मङ्गल स्नानो धौत वासः कृत स्वस्त्ययनो नान्दी श्राद्ध पूर्वाङ्ग मातृका पूजनं कुर्य्यात् पूजोपकरणा न्युपकल्प्य प्राङ् मुख उपाविश्य कुश यव जलान्यादाय अद्येत्यादि अमुक कर्म्मांगतया गणपति गौर्य्यादि चतुर्दश मातृका पूजन महं करिष्ये इति संकल्पं कृत्वा अक्षतैः ॐ भूर्भुवः स्वः गणपते इहागच्छेह तिष्ठ ॐ भूर्भुवः स्वः गौरि इहागच्छेह तिष्ठ एवं पद्मे शचिमेधे सावित्री विजये जये देव सेने स्वधे स्वाहे मातृः लोक मातृः धृते तुष्टे पुष्टे आत्म कुल देवते इति प्रत्येक मावाह्य ओं मनोजूतिर्जुषता माज्यस्य बृहस्पति र्यज्ञमिमं तनो त्वरिष्टं यज्ञ ᳪ समिमं दधातु विश्वे देवा सऽइहमादयन्त मोंऽप्रतिष्ठ इति प्रतिष्ठाप्य । ओं गणपतये नमः इति स्व

---

*एक विंशत्यह यज्ञे विवाहे दशवासरा त्रिषड् चौलोपनयने नान्दी श्राद्धं विधीयते स्मृत्यन्तरे ।

स्व *मूल मन्त्रैः †पञ्चोपचार पूजा कुर्य्यात् ततः वसोर्द्धारा पूजनम् पञ्च सप्त वानाति नीचा नचोच्छ्रिता कुड्यादिषु वसोः पवित्र मसि शतधारं वसोः पवित्र मसि सहस्र धारम देवस्त्वा सविता पुनातु वसोः पवित्रेण शत धारेण सुप्वा कामधुक्षः । इति मन्त्रेण घृत धारा उत्तर संस्थाः कुर्य्यात् ओं ‡वसो धारा देवताभ्यो नम इति पञ्चोपचारैः पूजयेत् ओं आयुष्यं वर्च्चस्य ꣳ रायस्पोषमौद्भिदम् इद ꣳ हिरण्यं वर्चस्व जैत्राया विशता दुनाम् । नतद्रक्षा ꣳ सिनपिशाचास्तरन्ति देवाना मोजः प्रथमज ꣳ ह्येतत् योविभर्ति दाक्षायण ꣳ हिरण्य ꣳ सदेवेषु कृणुते दीर्घमायुः समनुष्येषु कृणुते दीर्घमायुः यदा बध्नन् दाक्षायणा हिरण्य ꣳ शतानीकाय सुमनस्य मानाः । तन्म ऽआबध्नामि शत शारदायायुष्मान् जरदष्टि यर्थासम् । इति आयुष्य मन्त्र जपः । कर्ता आचमन प्राणायामौ कृत्वा अष्टौ ब्राह्मणानाहूय वहिरुप क्लृप्ते गोमयोपालिते मण्डले स्वागतं वः सुस्व गतं प्रत्येकं प्रश्नोत्तर पूर्वकं प्रागग्र कुशोत्तरष्वासनेषु प्राङ्मुखान् दक्षिणो पक्रमान् उदगपवर्गान् उपवेश्य स्वयमुदङ् मुख उपविश्य आद्ययोर्विप्रयो र्जानुनी स्पृशन्

---

* प्रणवादि नमोन्तं चतुर्थ्यन्तं स्वनाम मूलमन्त्रः यथा ओं गणपतये नमः ।

† गंध पुष्पे धूप दीपौ नैवेद्यः पंचते क्रमात् ।

‡ वसोर्धारा करणं कातीयाना मेवतान्येषां मनोजूति इति प्रतिष्ठां कृत्वा वैश्वदेवार्थे मात्राद्यर्थे पित्राद्यर्थे सपत्नीक मातामहाद्यर्थे द्वौद्वौ विप्रौ इति अष्टौ भोज्याः युग्मानाशयेद्वृद्धेति सूत्रात् ।

प्राग्वद्देश कालौ संकीर्त्य अमुक कर्म्म निमित्तांगाभ्युदयिक श्राद्ध कर्म्माणि नान्दीमुखा अस्मन्मात्रादि त्रय नान्दीमुखा अस्मत्पित्रादि त्रय नान्दीमुखा अस्मन्मातामहादि त्रय सम्बन्धि सत्यवसु संज्ञक विश्वेदेव कृत्ये भवन्तौ मया निमन्त्रिता विति ताम्बूलादि दान पूर्वकं निमन्त्रयेत् निमन्त्रितौ स्वः इति प्रतिवचनं पुनः तदुत्तर योर्जानुनी स्पृशन् अद्येहामुक गोत्राणां नान्दीमुखीनां अस्मन्मातृ पितामही प्रपितामहीनाममुकामुक देवीना ममुक निमित्ताभ्युदयिक श्राद्धे भवन्तौ मया निमन्त्रितौ ताम्बूलं दद्यात् निमन्त्रितौस्वः इति प्रतिवचनं तदुत्तरयो र्जानुनी स्पृशन् अद्येहामुक गोत्राणां नान्दीमुखास्मत्पितृ पितामह प्रपितामहानाममुकामुक शर्म्मणा ममुक कर्म निमित्ताभ्युदयिक श्राद्धे भवन्तौ नि० पुनः अद्येहामुक गो० नान्दीमुखास्मन्मातामह प्रमातामह वृद्ध प्रमातामहानाममुका० कर्तव्यामुक० भवन्तौ नि० अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः भवितव्यं भवद्भिश्च मयाच श्राद्ध कारिणा इति पठेत् देव द्विज पूर्वकं *पाद प्रक्षालनं विधाय अद्येह नान्दीमुखा० संवधि सत्य वसु संज्ञका विश्वेदेवा एतत् पादार्घ्यं वोनमः इति गन्ध पुष्पाक्षत युतं जलं दद्यात् अद्येह नान्दीमुखामुक गोत्रास्मन्मातृ पितामही

---

*नकुश ग्रन्थि हस्तस्तु पाद्यं दद्यात् विचक्षणः व्यासः ग्रंथिर्यस्य पवित्रस्य विप्रा पादाभिषेचने यथा वज्र हतो वृत्रो देवता पितरस्तथा। वृद्ध वसिष्ठः।

प्रपितामहोमुकामुक दे०य एतत्पादार्घ्यं वोनमः इति पूर्ववद्दद्यात् अद्येह नान्दीमुखा अस्मन्पितृ पितामह प्रपितामहा अमुकामुक शर्म्माण एतत्पादार्घ्यं वोनमः इति दद्यात् अद्येह नान्दीमुखा अस्मन्मातामह प्रमातामह बृद्धप्रमातामह अमुकामुक शर्म्माणः एतत्पादार्घ्यं वोनमः इति दद्यात् ततः ब्राह्मणानाचम्य स्वयमाचम्य श्राद्ध देशे प्रथम कल्पितेष्वासनेषु इदमासन मास्यता मिति उदगप वर्ग प्राङ मुखान् देव पूर्वं द्विजानुपवेश्य स्वयमुदङ्मुख उपविश्य कर्म्म सौकर्य्यार्थं कर्म्म पात्रं जलेनापूर्य्य दूर्वा दधि यव कुशांस्तत्र निक्षिप्य प्राणायामं कृत्वा विष्णु स्मरणंच कर्म्म पात्र जलेनोपकरणानि प्रोक्ष्य दूर्वा यव कुश जलान्यादाय अद्येह नान्दीमुखानां अस्मन्मातृ पितामही प्रपितामहानाममुकी गोत्राणां ममुकामुक देवीनां नान्दीमुखास्मन्मातामह प्रमातामह बृद्धप्रमातामहाना ममु० अमुक कर्म्म निमित्तं सत्य वसु संज्ञक विश्वेदेव पूर्वकं *सांकल्पिक

---

*तच्च देशाचारतः सपिंडक मपिण्डकंवा कार्य्यं भविष्ये पिण्ड निर्वपणं कुर्यान्नवा कुर्य्याद्विचक्षण इति अपिण्डके अग्नौ करण मर्घ्यं चावाहनंचावनेजनं पिण्ड श्राद्धे प्रकुर्वीत् पिण्डहीने निवर्तत ।

पिण्ड दान यज्ञेवशिष्टः दधि कर्कंधु संमिश्रान् पिण्डान् दद्यात् यथा क्रमं कर्कंधुर्बदरी फलं एकैकस्मै पिण्डद्वयं देयं एकं नाम्ना परं तूष्णिं दद्यात्पिण्ड द्वयं बुध इति चतुर्विंशतिमते ।

पिण्ड निर्वापरहितं यत्र श्राद्धं विधीयते स्वधा वाचन लोपोऽस्ति विकरस्तु न लुप्यते अक्षय्य दक्षिणा स्वस्ति सौमनस्यं यथा स्थितं एतद्धर्ज्यं ।

अग्रा मूलाः ऋजवो दर्वाः तिलार्थे यवाः कर्ता उदङ्मुखो यज्ञोपवीतीच ।

माभ्युदयिकं श्राद्धं भवदनुज्ञयाहं करिष्ये कुरुष्वेति प्रतिवचनं ततः सप्रणव व्याहृति पूर्विकाया गायत्र्या स्त्रिर्जपः विष्णु स्मरणं अद्येह मात्रादि त्रय पित्रादि त्रय मातामहादि त्रय श्राद्ध सम्बन्धिनः सत्यवसु संज्ञका विश्वेदेवाः इदमासनं वोनमः प्रागग्र ऋजु कुश त्रयं सयवजलं दक्षिणतः आसनो परिदद्यात् नान्दीमुख्योऽस्मन्मातृ पितामही प्रपितामह्यो ऽमुकामुक गोत्रा अमुकामुक देव्यः इदमासनं वोनम इति मातृवर्ग विप्रद्वयासनो परि वामतो विभज्यासनं दद्यात् अमुक गोत्राः नान्दीमुखा स्मत्पितृ पितामह प्रपितामहा अमुकामुक शर्म्माणः इदमासनं वोनमः इति पूर्ववद्दद्यात् अमुक गोत्राः नान्दीमुखास्मन्मातामह प्रमातामह वृद्धप्रमातामहाः अमुकामुक शर्म्माणः इदमासनं वोनमः इति दद्यात् ततः प्रत्यासनं दीप स्थापनं ततः जलदान पूर्वकं गन्धादि दत्वा कुश यव जलान्यादाय मात्रादि त्रय पित्रादि त्रय पितामहादि त्रय सम्बन्धि सत्यवसु संज्ञका विश्वेदेवा इमानि गन्ध पुष्प धूप दीप वासोलंकरण ताम्बूलानि वोनमः अमुक गोत्राः नान्दी मुख्यः अस्मन्मातृ पितामही प्रपितामह्यो मुकामुक देव्यः इमानि गन्ध पुष्प धूप दीप वासोऽलंकरण ताम्बूलानि

अत्र स्वधा शब्द स्थाने स्वाहा शब्दः सव्येनैव सर्वाः क्रियाः कुश स्थाने दूर्वाः विवाहादि मंगल कर्म्मांगे यज्ञादि कर्मांगे अमूला ऋजवो दर्भाः दूर्वा दर्भाश्च युग्माएव पूर्वान्ह कालाः प्रदक्षिणं कर्म ॥

वोनमः अमुक गोत्राः नान्दी मुखा अस्मत्पितृ पितामह प्रपितामहा अमुकामुक शर्म्माणः इमानि गन्ध० अमुक गोत्रा नान्दी मुख्योऽस्मन्मातामह प्रमातामह वृद्ध प्रमातामहा अमुकामुक शर्म्माणः इमानि गन्ध० अत्र परिवेषणं मात्रादि त्रय पित्रादि त्रय मातामहादि त्रय सम्बन्धिनो विश्वेदेवाः सत्य वसु संज्ञकाः इदमन्नं घृताद्युपस्कर सहितं परिविष्टं परिवेक्ष्यमाणं च द्विजेभ्यः तृप्ति पर्यन्त ममृत रूपं वोनमः अमुक गोत्रा नान्दी मुख्यो स्मन्मातृ पितामही प्रपितामह्यो मुकामुक देव्यः इदमन्नं घृताद्युपस्कर सहितं अमृत रूपं वोनमः एवं पित्रादि मातामहादि पात्राणां संकल्पं कुर्य्यात् ततो अक्षरस्तु पित्र्य मन्त्र वर्ज जपः ॥ तृप्तान् ज्ञात्वा विकिरं दद्यात् अग्नि दग्धाश्च ये जीवा येप्यदग्धा कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्तायांतु परां गतिम् ॥ सकृत्सकृदपो दत्वा पूर्व वद्गायत्रीं जपित्वा सम्पन्न मिति पृष्ट्वा सुसम्पन्न मिति तैरुक्ते शेषमन्नं किं क्रियतां इति पृष्ट्वा इष्टैः सह भुज्यता मिति तैरुक्ते ब्राह्मणाना चामयेत् सुप्रो क्षितमस्तु शिवा आपस्सन्तु सौमनस्य मस्तु अक्षतं चारिष्टं चास्तु नान्दी मुख्यो मातरः प्रीयन्तां नान्दी मुख्यः पितामह्यः प्रीयन्तां नान्दी मुख्यः प्रपितामह्यः प्रीयन्ताम् नान्दी मुखा पितरः प्री० नान्दी मुखाः पितामहाः प्री० नान्दी मुखा वृद्ध प्रपितामहा प्री० नान्दी० मातामहा प्री० नान्दी प्रमा० नान्दी वृद्धप्र० इति यवजलादि दद्यात् ततः प्राञ्जलि राशीः प्रार्थयेत् अघोराः पितरः सन्तु सांत्विति

ब्राह्मणाः गोत्रंनो वर्द्धतामिति यजमानः वर्द्धतां ते गोत्र मिति ब्राह्मणाः दातारो नोभि वर्द्धन्ता मितिय० अभिवर्द्धन्तां वोदा० वेदाश्च नो ऽभिवर्द्धन्तां अभिवर्द्ध० सन्ततिर्नो वर्द्धतां वर्द्ध० श्रद्धाच नोमाव्यगमत् माव्यग० बहुदेयंचनोस्तु अस्तुवो० अन्नंचनो बहु भवेत् भवतु वो० अतिथयश्च लभन्तांमे लभन्तां० एता आशिषः सत्याः सन्तु सन्त्वेता सत्या आशिषः दक्षिणा दानं मात्रादि त्रय पित्रादि त्रय मातामहादि त्रय श्राद्ध सम्बन्धि वैश्व दैविक श्राद्ध प्रतिष्ठार्थ ममुकशर्म्माभ्या मियं द्राक्षा मलकार्द्र मूलकादि रूपा विष्णु दैवता दक्षिणा मया दत्ता। अमुक गोत्राणां नान्दी मुखीनां मातृ पितामही प्रपितामहीना ममुकामुकी देवीनां कृतैतदाभ्युदयिक श्राद्ध प्रतिष्ठार्थ ममुक गोत्राभ्यां इयं द्राक्षा० दत्ता० अमुक गो० नान्दी मुखानां पितृ० कृतैतदभ्युदयिक श्रा० अमुक गो० नान्दी० मातामह० विश्वेदेवाः प्रीयन्तां स्वस्ति भवन्तो ब्रुवन्तु स्वस्तीति तैरुक्ते ब्राह्मणान्प्रणिपत्य प्रसाद्य ॐ वाजेवाजे वत्तवाजिनो नोधनेषु विप्राऽअमृता ऋतज्ञाः अस्यमध्वः पिवतमाद यध्वंतृप्तायातपाथिभिर्देवयानैः मात्रादि वर्गत्रय पूर्वकं देव द्विजौ विसृज्य ॐ आमावाजस्य प्रसवो जगम्यादेमे द्यावा पृथिवी विश्वरूपे आमागन्तापितरा मातरा चामा सोमो अमृतत्वेन गम्यात् इति विप्राननुव्रज्य प्रदक्षिणी कृत्या चाचमेत् ॥

श्री १०८ सकल शास्त्र प्रवीण गांभीर्य्यैश्वर्य्यादि गुण सम्पन्नानां
श्री १०८ पं० गंगाधर शास्त्रिणां चरणैक निलयेनोधमपुर
निवासि श्रीपंडित वीणा प्रपौत्रेण श्री चन्द्रमौल्यात्मजेन
वाल ब्रह्मचारिणा नित्यानन्द शर्म्मणा संगृहीतं
आभ्युदयिकं समाप्ति मगात् ॥

❁ ओं श्रीगणेशाय नमः ❁

अथ ग्रह शान्तिर्लिख्यते

कर्ता सुस्नात आचम्य प्राणानायम्येष्टं देवं नत्वा दिग्बन्धनं गौर सर्षपैः कुर्यात् । अपसर्पन्तु ते भूता ये भूता भूमि संस्थिता ये चात्र विघ्न कर्तार स्ते गच्छन्तु शिवाज्ञया । ओं प्राच्यै नमो ऽवाच्यै नमः प्रतीच्यै नमः उदीच्यै नमः पृथिव्यै नमोन्तरिक्षाय नमः । पवित्रे धृत्वा अपवित्रः पवित्रो वा सर्वावस्थां गतोपिवा यः स्मरेत्पुण्डरीकाक्षं सवाह्याभ्यन्तरः शुचिः । ओं अस्य श्री आसन शोधन मन्त्रस्य मेरु पृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसन शोधने विनियोगः । ओं पृथिवी त्वया धृता लोकाः देवित्वं विष्णुनाधृता त्वच धारय मां देवी पवित्रं कुरु चासनं । ओं पृथ्वी इहागच्छेतिष्ट सुप्रतिष्ट वरदा भव । ओं पृथिव्यै नम इति गन्धादिना पूजयित्वा प्रार्थयेत्—ओं मही द्यौः पृथिवीचन इम यज्ञं मिमिक्षतां पिपृतान्नो भरीमभिः । ततः *पञ्चगव्येन यज्ञभूमिं

---

* गोशकृत् द्विगुणं मूत्रं सर्पिर्दद्याच्चतुर्गुणं क्षारमष्ट गुणं प्रोक्तं पञ्च गव्ये तथा दधि ।

स्म्प्रोक्ष्य तत [†]आत्म पूजनं कुर्यात् । गन्धद्वारां दुराधर्षां नित्यपुष्टिं करीषिणीं ईश्वरीं सर्व भूतानां तामिहोपव्हयेश्रियं आत्मने पुरुषोत्तमाय नमः इति गन्धादिकं दद्यात् । ओं नमो धर्म्म निधानाय नमः सुकृत साक्षिणे नमः प्रत्यक्ष देवाय भास्कराय नमो नमः इति सूर्यं पूजयेत् । सुप्रकाशो महा दीप सर्वत्र स्तिमिरापहः प्रसीद मम गोविंद दीपोयं प्रतिगृह्यताम् इति दीपं । ओं वनस्पति रसो दिव्यो गन्धाढ्या गन्ध मुत्तम आघ्रेय सर्व देवानां धूपोयंप्रति गृह्य तामिति धूपं । ओं तत्सदद्य श्रीब्रह्मणो द्वितीय परार्द्धे श्रीश्वेत वाराह कल्पे वैवस्वत मन्वन्तरे अष्टाविंशतिमे कलियुगे कलिप्रथम चरणे जम्बू द्वीपे भारत खण्डे आर्य्यावर्तान्तर्गत ब्रह्मावर्तैक देशे कुमारिका क्षेत्रे मासोत्तमे मासे ऽमुक पक्षे ऽमुक तिथावमुक वासरे ऽमुक योग नक्षत्र करण मुहूर्तोपेतायाममुक शर्मणः पुत्रस्य वा कन्यायाः कर्तव्य निर्विघ्न विवाहोत्सवे शान्ति मध्ये प्रत्यूह व्यूहोपशमन पूर्वक प्रति दिन श्रेयोभ वृद्धि सिध्यर्थंयष्टव्य देवता प्रीतये यथा सम्भव नवग्रह यज्ञं करिष्ये तदंगत्वेन गणपत्याद्यखिल देवता पूजन माचार्य वर्णनंच करिष्ये । ततः आचार्य वर्णनं ओमद्येत्यादि अमुक गोत्रोमुकशर्माहं आत्मनः कन्यायाः कर्तव्य विवाह नैमित्तक नव ग्रह यज्ञे ऽमुक गोत्रममुक शर्म्माणं ब्राह्मणमेभिर्यथा सम्भववरण द्रव्यै राचार्य्यत्वेन त्वामह वृणे वृतोस्मीति प्रतिवचनं । ओं यथा विहितं कर्म कुरुकरवाणीति प्रतिवचनं पूजनं

[†] तिलकं कुंकुमे नैव सदा मंगल कर्म्मणि कुर्यात् सुमतिमान् न श्वेतचन्दनं मृदा इति विष्णु धर्म्मोत्तरे ।

कृत्वा प्रार्थयेत् आचार्यस्तु यथा स्वर्गे शक्रादीनां बृहस्पतिः तथा त्वं मम यज्ञेस्मिन् भवाचार्यो द्विजोत्तम । आचार्यस्य कङ्कण वन्धनं । ततः हरिः ओं स्वस्तिन इन्द्रो वृद्धश्रवाः स्वास्तिनः पूषा विश्ववेदाः स्वस्तिनस्तार्क्ष्योऽरिष्टनेमिः स्वास्तिनो वृहस्पतिर्दधातु पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः पयस्वतीः प्रदिशः सन्तु मह्यं ओं विष्णोरराटमसि विष्णोः इनप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि विष्णवेत्वा अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवता दित्या देवता मरुतो देवता विश्वेदेवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता द्यौः शान्तिरन्तरिक्षꣳशान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्विश्वेदेवा शान्तिः ब्रह्म शान्तिसर्वꣳ शांति शांतिरेव शांतिः सामा शांतिरेधि सुशांतिर्भवतु ओं विश्वानि देव सवितर्दुरितानि परासुव यद्भद्रं तन्न आ सुव इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरा महेमतीः यथा शमसद्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातरम् एतन्तेदेव सवितर्यज्ञं प्राहुर्पृहस्पते ब्रह्मणे तेन यज्ञपतिं तेन मामव मनो जूतिर्जुषतामाज्यस्य वृहस्पति यज्ञ मिमं तनोत्वरिष्टं यज्ञꣳ सामिमं दधातु विश्वेदेवा सइहमादयंतामोंप्रतिष्ठ एष वै प्रतिष्टानाम यज्ञो यत्रैतेन यज्ञेन जयंतेन सर्वमेव प्रतिष्ठितं भवतु ओं गणानांत्वा गणपति ꣳ हवामहे प्रियानांत्वा प्रियपति ꣳ हवामहे निधीनांत्वा निधिपति ꣳ हवामहे वसो मम आहम जानि गर्भध मात्वमजासि गर्भधम् नमो गणेभ्यो

गणपति भ्यश्चवो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्चवो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्चवो नमोनमो विरूपेभ्यो विश्वरूपेभ्यश्चवोनमोनमः सुमुखश्चैक दन्तश्च कपिलो गजकर्णकः लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः धूम्रकेतु गणाध्यक्षो भालचन्द्रो गजाननो द्वादशैतानि नामानि यः पठेच्छृणुयादपि विद्यारम्भे विवाहेच प्रवे॰। निर्गमे तथा संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते अत्रागच्छ जगद्वंद्य सुरराजार्चितेश्वर ओं अनाथनाथ सर्वज्ञ लोकेश गणनायक ओंभूर्भुवः स्वः श्री भगवन् सिद्धि बुद्धि सहितेहागच्छेह तिष्ठ सुप्रतिष्ठ वरदोभव मम पूजां गृहाण गंगणपतये आसनं नमः [*]पाद्यं, [†]अर्घ्यं, आचमनीयं, स्नानं, गन्धं, [‡]अक्षतं, पुष्पं, धूपोदीपश्चनैवेद्यं नमः पुनराचमनीयं दक्षिणाद्रव्यं प्रार्थना नमो देव गणेशाय नमस्ते विघ्न नाशिने नमो मूषकमारूढ गजवक्त्र नमोस्तुते नमः कात्यायनी पुत्र नमः परशु धारिणे रवेरुदयतोरूपविद्या बुद्धिवरप्रद देहिमे रूप सौभाग्यं देहिमे पुत्र सम्पद रिच्छासिद्धि प्रदो देव यथोक्त वरदो भव इति पूर्वे ऋग्वेदः पद्मपत्राक्षो गायत्रः साम दैवतो ऽत्रि गोत्रस्तु विप्रेन्द्र ऋत्विक् त्वंममखे भव शांति

---

[*] दूर्वा च विष्णुक्रांता च श्यामाकं पद्ममेव च पाद्याङ्गानि चत्वारि कथितानि समासतः।

[†] आपः क्षीरं कुशाग्रणि दध्यक्षत तिलस्तथा यवः सिद्धार्थकश्चेति अर्घोंवाष्टाङ्ग उच्यते।

[‡] अक्षतास्तु यवाः प्रोक्ता अभावे व्रीहयः स्मृतः तदभावेतु गोधूमा नतुखण्डित तण्डुला इति संस्कारम्।

पाठं मखे कुरू अग्निदूतं पुरोधते ओं अग्नि मीले पुरोहितमितिदक्षिणेकातराक्षो यजुर्वेद स्त्रैष्टुभो विष्णु दैवतो वैशम्पायन विप्रेन्द्र ऋत्विकत्वं मेमखे भव शान्ति पाठं कुरु इषेत्वोर्जेत्वा अनेन पश्चिमे सामवेदस्तु पिंगाक्षो जागतः शक्र दैवतः भारद्वाजस्तु विप्रेंद्र ऋत्विकत्वंमेमखे भव शांति पाठं मखे कुरु ओं अग्न आयाहि वीतयेउत्तरेबृहन्नेत्रोथर्व वेदोनुष्टुभो रुद्र दैवतः सुमन्तुश्चापि विप्रेन्द्र ऋत्विकत्वं मखे भव शांति पाठं मखे कुरु शन्नोदेवीरभिष्टय अथ जज्जलि पूरणं तत्र मन्त्रः लताच पातश्च युतिश्चवेधो या मित्र खार्जूरकक्रांति साम्यं उपग्रहो ग्रहो योग दशाभिधाये दग्धा विषाख्याश्च मुहूर्तकाश्च पञ्चाङ्गजाता महदल्पकाश्च शरादि पञ्च प्रति संज्ञकाश्च वक्रेषु कालेषु तथैव चोक्ता आयांतु सर्वेभिमदर्थसिध्यै मुद्राभिधाने किलसन्तु निद्रिता अवज्ञदा सन्तु भवन्तु तुष्टाः दुष्टाः सुतुष्टाः सकला भवन्तु कुर्वन्तु नित्यं बहु मङ्गलानि इति मन्त्रेण दीप सहित *जज्जलिद्वयं मुद्रयेत् एकं पश्चात् अद्येत्यादि अमुक गोत्रामुकीदेवी आत्मीय विवाहोत्सवे गणपत्यादि सूर्यादि नव ग्रहादि समस्त देवता प्रीतये एतदुद्वर्तनादि द्रव्यं स्विन्न चणक पूपाद्युपस्कर युतं सदक्षिणं यथा नाम गोत्राय ब्राह्मणाय दातुमह मुत्सृजे एवं कुल देवतायै दद्यात् ततः कन्या हस्तेन प्रथमो द्वर्तनङ्कारयित्वा तदनन्तरं बांधवैरुद्वर्तनं कार्य्यं ततः स्नापितं बालं

---

*दक्षिणे कुल देवस्य जज्जलि त्रितयन्न्यसेत्।

कन्यां वा *कंकण बन्धनानन्तरं मातुलादयोऽभिषेकं कुर्य्युरिति शिष्टाचारः ततस्तं मण्डपे समानीयाद्यर्घादिकं दत्वोपवेश्य ततस्तोरणं पूजयेत् ओं भगवन् तोरण द्वारपाल इहागच्छेहातिष्ठेत्यादि ओं त्रिलयस्यरुद्ररूपोऽसि महाकाय महाप्रभो अस्माकं द्वारमाश्रित्य रक्ष यज्ञनिकेतनं त्वया सर्वाणि रक्षांसि विघ्नश्चैव वनस्पते भक्षणीयानि सततं ममार्घ्येणैव सर्वतः ततो यज्ञमालां भगवति यज्ञमाल इत्यादिना ओं यज्ञमाले महामाले सर्वदा यज्ञरक्षिणी शत्रुसंहारिणी देवी मित्राणां हर्ष वर्द्धनी यज्ञमाले नमस्तुभ्यं यज्ञरक्षां कुरुष्वमे दैत्यानां देह नाशाय भक्तानामभयायच सङ्कटो विकटो दुष्टो भूत प्रेत पिशाचकाः दुष्टाये दानवा दैत्याः क्षुद्रा यज्ञ विनाशकाः तेसर्वे निष्फला यांतु यज्ञं भुञ्जन्तु देवताः ततः षोडश†मातृकाः श्रीसहिताः स्थापयेत् तद्यथा ओं भूर्भुवः स्वः गौरि इहागच्छेह तिष्ठ एवं सर्वत्र पद्म शचिमेधे सावित्री विजये जये देव सेने स्वधे स्वाहेमातरः लोकमातरः धृते पुष्टे तुष्टे आत्म देवते इत्यावाह्य मनोजूतिरितिप्रतिष्ठाप्य ओं गौर्य्यै नमः आसनं पाद्यं अर्घ्याचमनीयं स्नानं गन्धमक्षतं पुष्पं धूपं दीपं नैवेद्यं दक्षिणाद्रव्यं

---

*दूर्वा यवांकुराश्चैव वालकं चूत पल्लवाः हरिद्राद्वय सिद्धार्थ शिखिपत्रोरगत्वचः कङ्कणौषध यश्चैताः कौतुकाख्या नवस्मृताः। "भविष्ये"

†पशान्यां कलशो स्थाप्यो गणेशो मातरस्तथेति मदनरत्ने।

पुनराचमनीयश्चेत्यादि प्रत्येकां पूजयेत् वा ओं गौर्य्यादि षोडश मातृकाभ्यः श्री सहिताभ्यो नमः आसन मिति सह पूजयेत् प्रार्थना ओं गौरी पद्मा सची मेधा सावित्री विजया जया देव सेना स्वधा स्वाहा मातरो लोक मातरः धृतिः पुष्टि स्तथा तुष्टि स्तथात्म कुल देवता गणेशेनाधिकाह्यताः वृद्धौ पूज्याश्च षोडश ततो *ललितादि सप्त मातृका आवाह्य पूजयेत् ओं भूर्भुवः स्वर्ललिते इहागच्छेहतिष्ठेत्यादि एवं उमे गौरी अम्बिके सलिलाश्रये भगाहि भगाक्षि प्रत्येकां ओं ललितायै नमरिति नाम मंत्रैः पूजयेत् प्रार्थना ओंललिताच उमा गौरी अम्बिका सलिलाश्रया भगाहीच भगाक्षीच सप्तेता घृत मातृकाः ततः ओंकारेहागच्छेत्यावाह्य पूजयित्वा प्रार्थयेत् ओंकारं विंदुसंयुक्तं नित्यं ध्यायंति योगिनः कामदं मोक्षदं चैव ओंकाराय नमो नमः ततः †कुलदेवं पूजयित्वा प्रार्थयेत् ओं कुलानां शुभदः शांतः सर्वदा कुल वर्द्धनः आयुर्वलं यशो देहि कुलदेव नमोस्तुते ततोग्निस्थापनं ओमद्येत्यादि मम कर्तव्ये ऽस्मिन्कर्मणि कुंडे ‡स्थंडिले

---

*कुड्यादौ सप्त मातृकाः वितस्तिमानतो लेख्या घृतेन ललितादय इति मदनरत्ने।

अंगुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुलरित्यमरः।

†कुलदेवंतु पूर्वस्यां मदनरत्ने।

‡हस्तमात्रं प्रविस्तारं सुसमं त्र्यंगुलोच्छ्रितं नित्यं नैमित्तकं होमं स्थंडिले वा समाचरेत्।

होम स्थानं दक्षिणस्यां हस्तमात्रं चतुर्भुजं चतस्रं च तथा कुर्य्यात् ब्रह्मणं तस्य दक्षिणे मदन रत्ने।

वाग्नि स्थापनपूजनञ्च करिष्ये ततः पञ्चभू संस्कारान्कुर्य्यात् त्रिभिर्दर्भैस्थंडिलस्य परि[*]समूहनं कृत्वा दर्भानैशान्यां त्यजेत् [†]गोमयेनोदकेन लेपनं स्रुवमूलेन [‡]त्रिरुल्लेखनं अनामिकांगुष्ठाभ्यां रेखाभ्यः [§]पांशूद्धरणं प्रतिरेखं जलेना[‖]भ्युक्षणं तत्र कांस्यपात्रेकांस्यपात्राछादिता [¶]मग्नीं समानीय स्थापयेत् पूजयेच्च तद्यथा ओं क्रव्यादिति मन्त्रस्य प्रजापति ऋषिस्त्रिष्टुप्छन्दोऽग्निर्दैवता ज्वल दुल्मक निरसने विनियोगः तत्रयोऽग्निः कांस्यपात्रेणानीतस्तस्मात् ज्वलदिंधनं गृहीत्वा मन्त्रं पठेत् ओंक्रव्यादमग्निं प्रहिणोमिदूतं यमराज्यं गच्छ त्वरित प्रवाह इत्यर्द्धर्चेन ज्वल दुल्मकं दक्षिणस्यां दिशि प्रक्षिपेत् ओंइहैवायमितरो जातवेदा देवेभ्योहव्यं वहतु प्रजानत इत्यनेनाग्निं रेखोपरि अभिमुखीं स्थापयेत् आवाहयिष्ये वरदं देवेशं जात वेदसं सप्त जिह्वं देवमूर्तिं देव देवं हुताशनं आयाहि शांडिलीपुत्र देव पुत्र महा मुने हिरण्यरेत आयाहि शीघ्रमायाहि पावक शांडिल्य गोत्र

---

[*] कुशाः समूहाय सप्त शाखाः प्रकीर्तिताः अग्रे प्राङ्मुखः कर्तापि कथं होम अतएव पर्य्युक्षण।

[†] वन्ध्या दुष्टाच हीनांगी मृतवत्साच या भवेत् यज्ञार्थे गोमयं तस्या नाहरेदिति भाषितम्।

[‡] स्रुवेण कुशेनापि कुर्य्यादुल्लेखनं भुवः अस्थि कंटक शुध्यर्थं ब्रह्मणः परिभाषिते।

[§] ये भ्रमन्ति सदाकाशे पतंगाद्या भयंकराः तेषां प्रहरणार्थाय मतं प्रोद्धरणं द्विज।

[‖] आपो देव गणाः सर्वे तथा पितृगणाः स्मृतः तेनाहि प्रोक्षणं प्रोक्तं मुनिभिः विधिको विधैः।

[¶] अग्निरानयनं प्रोक्तं सौभाग्य स्त्रीभिरेवच शुभं मृण्मये पात्रे प्रोक्षाद्भिस्तं निधापयेत्।
तच्चोक्तं कुषकंडिका भाष्ये हव्यवाट् सलिलं दृष्ट्वा भीतः प्रत्यङ् मुखो भवेदिति।

वैश्वानर मेषध्वज मेसंमुखो भव ओं भूर्भुवः स्वरग्ने इहागच्छेहतिष्ठसुप्रतिष्ठ वरदोभव ओ*मग्नये नमः इति पाद्यमर्घ्यं माचमनीयं स्नानं गन्धं पुष्पमक्षतं धूप दीप नैवेद्यं समर्पयामि । अथ ग्रह †मण्डलं लिखेत् अष्ट दलं पद्मंलिखित्वा तत्र ग्रहानामावाह्य पूजयेत् अद्यामुक कर्म्मणि सूर्य्यादि नवग्रहाणामधि देवता प्रत्यधि देवता विनायकादि पञ्च लोकपाल सहितानां स्थापनं पूजनञ्च करिष्ये प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता व्याहृतीनां क्रमेण विश्वामित्र जमदग्नि भरद्वाज ऋषयः अग्नि वायु सूर्य्यो देवता गायत्र्युष्णिगनुष्टुप् छन्दांसि सूर्यादीनां स्थापने विनियोगः आकृष्णेति मन्त्रस्य हिरण्यस्तूप ऋषिः सविता देवता त्रिष्टुप्छन्दः सूर्य्यावाहने विनियोगः ओं आकृष्णेन

---

*नकुर्यादग्निं धमनं कदाचिद्व्य जनादिना मुखेनैवधमेदग्निं मुखादग्नि रजायत ।

†मङ्गलेषुच सर्वेषु मण्डलः गृह वामतः इति सप्तर्षि मतं ।
गृहस्योत्तर पूर्वेण मण्डलं कारयेत् बुधः ।
कुण्डस्य प्रागुदीच्यां वा प्राच्यामुत्तरतोपिवा चतुरस्त्रं चतुर्द्वारं कर्तव्यं ग्रह पीठकं ।

कुण्डस्य रुद्र दिग्भागे द्विहस्तं पीठमाचरेत् किंचिन्मध्योन्नतं कुर्य्यादुछ्राये द्वादशांगुलं त्रिशांगुलं प्रकर्तव्य मन्तरं गृह पं व्योः मुष्टि माना स्तथा श्वेता अभग्नाश्चैव शालयः ग्रहाणां स्थापने प्रोक्ता अर्धार्धं प्रति देवतमिति शौनकः ।

गृहादुत्तरेईशाने वा कृतायां चतुर्दिक्षु हस्तमात्रवरायां चतुस्त्रिद्व्यंगुल प्रमाण भूमिकायां तण्डुलैः सकर्णिक मष्टदलं पद्मं लिखेत् तत्र ग्रहान् यथा क्रमं लिखेत् प्रतिमांवा तदभावे ऽक्षतेषु पुष्पेषु वा पूजयेत् ।

तद्दक्षिण वाम पार्श्वयो रधि देवता प्रत्यधि देवते तदभिमुख्यौ स्थापयेत् ।

रजसा वर्तमानो निवेशयन्नमृतं मर्त्यंच हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ओं भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपसगोत्र भगवन् सूर्येहा गच्छेह तिष्ठ सुप्रतिष्ठ वरदो भव मम पूजां गृहाण इति *सूर्यं मध्ये ॥ आप्यायस्वेति मन्त्रस्य गौतम ऋषि गायत्री छन्दः सोमोदेवता सोमावाहने विनियोगः ॥ ओं आप्यायस्वसमेतुते विश्वतः सोम वृष्णं भवा वाजस्य संगथे ॥ ओं भूर्भुवः स्वः यमुना तीरोद्भवात्रेय गोत्र भगवन् सोमेहा० इति †सोमं ॥ अग्नि मूर्द्धेति मन्त्रस्य विरूपांगिरस ऋषि भौमो देवता गायत्री छन्दः भौमावा० ओं अग्नि मूर्द्धादिवः ककुत्पतिः पृथिव्या अयम् । अपा ँ रेता ँ सि जिन्वति ॥ ओं भूर्भुवः स्व अवन्ती समुद्भव भारद्वाजस गोत्र भौमेहा० इति ‡भौमं ॥ ओं उद्बुध्यस्वेति मन्त्रस्य परमेष्ठी ऋषिः बुधो देवता त्रिष्टुप्छन्दः बुधा० ॥ ओं उद्बुध्यस्वाग्ने प्रतिजा गृहित्वामिष्टा पूर्तेस ँ सृजेथा मयंच । अस्मिन्सधस्थे अध्युत्तरस्मिन् विश्वेदेवा यजमानश्च सीदत ॥ ओं भूर्भुवः स्वः मगध देशोद्भव आत्रेय गोत्र भगवन् बुधेहा० इति §बुधं ॥ ओं बृहस्पते इति मन्त्रस्य गृत्समद

---

*कर्णिकायां मध्ये रक्ताक्षतैर्वर्तुलं प्राङ्मुखं द्वादशांगुलं सूर्यं ।

†आग्नेये दले शुक्लाक्षतैः चतुरस्त्रं प्रत्यङ् मुखं चतुर्विंशत्यंगुलं सोमं स्थापयेत् ।

‡दक्षिणे रक्ताक्षतैः त्रिकोणं दक्षिणमुखं भौमं त्र्यंगुलं ।

§ईशाने हरिताक्षतैः वाणाकारं उदङ् मुखं चतुरांगुलं बुधं ।

ऋषि र्बृहस्पतिः दैवता त्रिष्टुप्छन्दः बृहस्पत्यावा० ॥ ओं बृहस्पतेऽ अति यदर्य्योऽ अर्हाद्युमद्विभाति क्रतु मज्जनेषु यद्दीदयच्छवसऽ ऋत प्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥ ओंभूर्भुवः स्वः सिन्धु देशोद्भव आंगिरस गोत्र भगवन् बृहस्पतेरिहा० इति *बृहस्पतिं ॥ अन्नात्परिश्रुतेतिमन्त्रस्य भरद्वाज ऋषिः शुक्रो देवता द्विपदा विराट् छन्दः शुक्रावा० ॥ ओं अन्नात्परिश्रुतोरसं ब्रह्मणा व्यपिवत्क्षत्रम्पयः सोमं प्रजापतिः । ऋतेन सत्यमिंद्रियं विपान ँ शुक्र मंधसऽ इन्द्रस्येन्द्रिय मिदम्पयोमृतम्मधु ॥ ओं भूर्भुवः स्वः भोजकट देशोद्भव भार्गव सगोत्र भगवन् शुक्रेहा० इति †शुक्रं ॥ शन्नोदेवीति मन्त्रस्य सिन्धुद्वीप ऋषिः शनिदैवता गायत्री छन्दः शन्या० ॥ ओं शन्नो देवीरभिष्टय आपो भवन्तु पीतये शंय्यो रभिस्रवंतुनः ॥ ओं भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यप गोत्र शनेइहा० इति ‡शनि पूजा॥ कयानश्चित्र इत्यस्य वामदेव ऋषिः राहु दैवता गायत्री छन्दः राहु० आवा० ॥ ओं कयानश्चित्र आभुव दूती सदा वृधः सखा । कयाशचिष्ठ यावृतः ॥ ओं भूर्भुवः स्वः स्वराटिका पुरोद्भवपै ठीनसी गोत्र भगवन् राहो रिहा० इति §राहुं ॥ ओं केतुं कृण्वन्निति मन्त्रस्य

---

*उत्तरे पीताक्षरैः दीर्घं चतुरस्त्रं उदङ् मुखं गुरूं।

†पूर्वे शुक्लाक्षतैः पञ्चकोणं प्राङ्मुखं नवांगुलं शुक्रं।

‡पश्चिमे कृष्णाक्षतैः चापाकारं पश्चिम मुखं द्व्यंगुलं शनिं।

§नैर्ऋते कृष्णाक्षतैः शूर्पाकारं दक्षिणमुखं पञ्चविंशत्यंगुलं राहुं

मधुछन्द ऋषिः केतवो देवता गायत्री छन्दः केत्वा० । ओं केतुं कृणवन्न केतवे पेशो मर्य्या अपेशसे । समुषद्भिरजायथाः ॥ ओं भूर्भुवः स्वः अन्तर्वेदी समुद्भव जैमिनो गोत्र भगवन् केतोरिहा० इति *केतुं ॥ इति ग्रहान्संस्थाप्य ततोधि† देवता दक्षिणेऽक्षत पुञ्जेषु पुष्पेषु वावाहयेत् तद्यथा त्र्यंवक मिति मन्त्रस्य वसिष्ठ ऋषि रुद्रो देवता अनुष्टुप्छन्दः रुद्रा० ओं त्र्यंबकं यजामहे सुगन्धिं पुष्टि वर्धनम् । उर्वा रुक मिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ओं भूर्भुवः स्वः ईश्वर इहा० ॥ श्रीश्चते इति मन्त्रस्य नारायण ऋषि उमा देवता त्रिष्टुप्छन्दः उमावा० ओं श्रीश्चते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् इष्णं निषाणामुम्म इषाण सर्वं लोकम्मइषाण ॥ ओं भूर्भुवः स्व उमे इहा० ॥ यद क्रन्दइति मन्त्रस्य भार्गव जमदग्नि दीर्घतमस ऋषि स्कन्दो देवता त्रिष्टुब्छन्दः स्कन्दा० ओं यदक्रन्दः प्रथमं जायमान उद्यंत्समुद्रा दुतवापुरीषात् । श्येनस्य पक्षाहरिणस्य वाहु उपस्तूत्यं महि जातंते अर्व्वन् ॥ ओं भूर्भुवः स्वः भगवन् स्कन्देहा० ॥ विष्णोरराट इति मन्त्रस्य प्रजापति ऋषिः विष्णो

---

*वायव्ये चित्राक्षतैः ध्वजाकारं दक्षिणमुखं षडंगुलं केतूं ।

सर्वे आदित्याभि मुखाः स्थाप्याः ।

†शिवः शिवागुहोविष्णुर्ब्रह्मेन्द्र यम कालकाः चित्रगुप्तोथरव्यादि दक्षिणतश्चाधि देवताः मंदनरत्ने ।

देवता यजुः छन्दः विष्णोरात्वा० ओं विष्णोरराट् मसि विष्णोः श्नप्रेस्थो विष्णोः स्यूरसि
विष्णो ध्रुवोसि वैष्णवमसि विष्णवेत्वा ॥ ओं भूर्भुवः स्वः विष्णोइहा० ॥ ओं ब्रह्मयज्ञान
मिति मन्त्रस्य ब्रह्मा ऋषिः त्रिष्टुप्छन्दः ब्रह्मा० ओं ब्रह्मयज्ञानं प्रथमं पुरस्तात् विसी
मतः सुरुचो वेनआवः सबुध्न्या उपमा अस्य विष्ठाः सतश्चयोनि मसतश्च विवः ॥
ओं भूर्भुवः स्वः ब्रह्म इहा० इति ब्रह्माणं ॥ त्रातार मिति मन्त्रस्य गर्ग ऋषिरिंद्रो देवता
जाति छन्दः इन्द्रात्वा० ओं त्रातार मिन्द्र मवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूर मिन्द्रम्
ह्वयामि शक्रं पुरुहूत मिन्द्रꣳ स्वस्तिनो मघवाधात्विंद्रः ॥ ओं भूर्भुवः स्वः
भगवन्निन्द्रेहा० इति इन्द्रम् ॥ यमायत्वेत्यस्य भार्गव ऋषिः जमदग्निर्दीर्घतमस
ऋषिः त्रिष्टुछन्दः यमो देवता यमा० । ओं यमात्वांगिरस्वते पितृमते स्वाहा
स्वाहाघर्माय स्वाहा घर्म्मः पित्रे ॥ ओं भूर्भुवः स्वः भगवन् यमे० इति यमं ॥
ओं कार्षिरसीत्यस्य दध्यङ्ङाथर्वण ऋषिः अनुष्टुछन्दः कालो देवता कालावा० ।
ओं कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि समापो अद्भि रग्मतस मोषधीभि
रोषधीः । ओं भूर्भुवः स्वः कालेहा० इति कालं । चित्रावसो इत्यस्य प्रजापतिः ऋषिः
जगती छन्दः चित्रगुप्तो देवता चित्रगुप्ता० ओं चित्रावसो स्वस्तिते पारमशीय संत्वमग्ने
सूर्यस्य वर्चसा गथाः समृषीणां स्तुतेन ॥ ओं भूर्भुवः स्वः चित्रगुप्तेहा० इति चित्रगुप्तं ॥

अथ *प्रत्यधि देवता ग्रहाणां वामे स्थाप्याः तद्यथा अग्निदूत मित्यस्य विरूपाक्ष ऋषिः अग्निर्देवता अनुष्टुठ्छन्दः अग्निरा० । अग्निदूतं पुरोदधे हव्यवाह मुपब्रुवे देवां आसादयादिह । ओं भूर्भुवः स्वः अग्नेरिहा० इत्याग्निं ॥ अप्सुमेति मेधातिथि ऋषिः आपो देवता अनुष्टुठ्छन्दः अप० । ओं अप्सुमे सोमो अब्रवीदन्त विश्वानि भेषजा अग्निं विश्व सम्भवमापश्च विश्वभेषजी ॥ ओं भूर्भुवः स्वः आपः इहा० । इत्यापः ॥ ओं स्योना इति मेधातिथि ऋषिः भूमिर्देवता गायत्री छन्दः भूम्यावा० । ओं स्योना पृथिवी नो भवा नृक्षरानिवेशनीय छानः शर्म्म सप्रथाः ॥ ओं भूर्भुवः स्वः भूमे इहा० । इति भूमिं ॥ इदं विष्णुरिति मन्त्रस्य मेधातिथि ऋषिः विष्णुर्देवता गायत्री छन्दः विष्णोरा० ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्यपा ँसुरे ॥ ओं भूर्भूवःस्वः विष्णो इहा० इति विष्णुं ॥ इन्द्र श्रेष्टाणीति मन्त्रस्य गृत्समद ऋषिः इन्द्रो देवता त्रिष्टुठ्छन्दः इन्द्रा० ओं इन्द्र श्रेष्टाणि द्रविणा निधेहि चित्तं दक्षस्य सुभगत्व मस्मै । ओं भूर्भुवः स्वः इन्द्र इहा० इति इन्द्रं । इन्द्राणीत्यस्य वृषाकपि ऋषिः इन्द्राणी देवता पंक्ति छन्दः इन्द्राणयावा० । ओं इन्द्राणी मासुनारिषुसुभगा महश्रवं नह्यस्या अपरंजसामरतेपति विश्वस्मा दिन्द्र उत्तरः । ओं भूर्भुवः स्वः इन्द्राणीहा० । इति इन्द्राणी ॥ प्राजापति रति मन्त्रस्य हिरण्यगर्भ ऋषिः प्रजापतिर्देवता त्रिष्टुप्छन्दः प्रजापतिरा० । ओं प्रजापतेन

---

*अग्निरापोधराविष्णु शक्रेन्द्राणी प्रजापतिः सर्पोब्रह्मा तथा वामे क्रमात् प्रत्यधि देवताः ।

त्वदेतान्यन्न्यो विश्वारूपाणि परिताबभूव यत्कामस्ते जुहुमस्तन्नो अस्त्वयममुष्य पिता सात्रस्यपिता वयꣳस्याम पतयो रयीणाम् ओं भूर्भुवःस्वः प्रजापत इहा० इति प्रजापतिं ॥ नमोस्तु सर्पेभ्य इति देवा ऋषयः सर्पा देवता अनुष्टुप्छन्दः सर्पा० । ओं नमोस्तु सर्पेभ्यो येकेच पृथिवी मनुये अन्तरिक्षेये दिवितेभ्यः सर्पेभ्यो नमः ओं भूर्भुवः स्वः सर्पा इहा० । इति सर्पान् ॥ ब्रह्मयज्ञानमिति मन्त्रस्य प्रजापतिः ऋषिः ब्रह्मा देवता त्रिष्टुप्छन्दः ब्रह्मा० ओं ब्रह्म यज्ञानं प्रथमं परस्ताद्विसीमतः सुरुचो वेन आवः सबुध्न्या उपमा अस्य विष्ठाः सतश्च योति मसतश्च विवः । ओं भूर्भुवः स्वः ब्रह्मन्निहा० । इति ब्रह्माणं । ततः पञ्चलोक*पालान् । गणानांत्वेति मन्त्रस्य प्रजापतिः ऋषिः गणपतिर्देवता यजु छन्दः गणपत्या० ओं गणानांत्वा गणपतिꣳहवामहे प्रियाणांत्वा प्रियपतिꣳहवामहे निधिनां त्वा निधि पतिꣳहवामहे वसो मम आहम जानि गर्भध मात्वमजासि गर्भधम् इति गणपतिं । अम्बे इत्यस्य प्रजापतिः ऋषिः दुर्गा देवता अनुष्टुप्छन्दः दुर्गावा० । ओं अम्बे अम्बिके अम्बालिके नमानयति कश्चनससस्त्यश्वकः सुभद्रिकांकां पील वासिनीं ओं भूर्भुवःस्वः अम्बे इहा० इति दुर्गां॥ वातोवेत्यस्य गन्धर्वाः ऋषयः उष्णिक् छन्दः वातो देवता वायवा० । ओं वातो वा मनो वा गन्धर्वाः सप्त विꣳशातिः ॥ ते अग्नेश्व मयुञ्जस्ते अस्मिञ्जवमादधुः । ओं भूर्भुवः स्वः वायो इहा० इति वायुम् ॥ ऊर्ध्व ऊषण इति प्रजा

---

*गणेशश्चण्डिका वायु राकाश मश्विनौ तथा ग्रहाणा मुत्तरे भागे लोकपालाः प्रकीर्तिताः ।

पति ऋषि रनुष्टुब्छन्दः आकाशो देवता आकाशावा० । ओं ऊर्ध्व ऊषुण ऊतये तिष्ठादेवोनसविता ऊर्ध्वोवाजस्य सनिता यद ञ्जिभि र्वाघद्भि र्विह्वयामहे । ओं भूर्भुवः स्वः आका० इत्याकाशं ॥ यावांकश इत्यस्य मेधातिथिः ऋषि अश्विनो देवते यजुः छन्दः अश्विनावा० । ओं यावां कशामधुमत्यश्विना सूनृता वतीतया यज्ञं मिमिक्षितमम् भू० अश्विनौ इहा० इत्यश्विनौ ॥ इति पञ्चलोक पालान् अप्येन्द्रादि *लोकेशानां स्था० पूर्व दलाग्रे त्रातारमिति मन्त्रस्य गार्ग्य ऋषि इन्द्रो देवता त्रिष्टुब्छन्दः इन्द्रा० त्रातारमिन्द्र अनेन भू० इन्द्रेहा० इति इन्द्रम् ॥ ईशान दलाग्रे अग्निं ॥ अग्निदूतमित्यस्य विरूपाक्ष ऋषि अनुष्टुब्छन्दः अग्निर्देवता अग्न्या० आग्नि दूतमित्यग्निं दक्षिण दलाग्रे यमायेति मन्त्रस्य भार्गव जमदग्नि दीर्घतमाः ऋषिः त्रिष्टुप्छन्दः यमो देवता यमा० ओं यमाय त्वां गिरस्वते इति यमं नैर्ऋति दलाग्रे नैर्ऋतिं एषते इत्यस्य वरुण ऋषि यजुः छंदः निर्ऋति र्देवता निर्ऋत्या० । ओं एषत निर्ऋते भागस्त्वं जुषस्व स्वाहाग्ने नेत्रभ्यो देवेभ्य

---

*पीतमिन्द्रं तथा वायुं रक्तमग्नि धनेश्वरं कृष्णवर्णं यमं चैव नैर्ऋतिं धूम्र वर्णकं अनन्तं कृष्ण वर्णं च दिक्पालं वर्णं विदुः ।

वज्र शक्ति दण्ड खड्ग पाशांकुश गदाशूल चिन्हेषु ईशानेंद्र मध्ये ब्रह्माणं नैर्ऋति वरुण मध्ये सर्पं पूजयेत् ।

पुरः सद्भ्यः स्वाहा यम नेत्रेभ्यो देवेभ्यो दाक्षिणा सद्भ्यः स्वाहा विश्वेदेव नेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुण नेत्रेभ्यो वामरुन्नेत्रेभ्यो वादेवेभ्य उत्तरा सद्भ्यः स्वाहा सोम नेत्रेभ्यो देवेभ्यो उपरिसद्भ्यो ढुवस्सद्भ्यः स्वाहा भू० । इति निर्ऋतिं ॥ इमं मे इत्यस्य शुनः शेफ ऋषि त्रिष्टुप्छंदो वरुणोदेवता वरुणा० । ओं इमं मे वरुणश्रुधीर्हवमद्याच मृडय त्वा मवस्युराचके भू० *वरुणहा० इति वरुणम् । वातो इत्यस्य गन्धर्वः ऋषिः उष्णिक् छन्दः वातो देवता वायुरा० । ओं वातोवा मनो गन्धर्वरिति †वायुम् ॥ वय ꣳमित्यस्य वन्धुः ऋषि गायत्री छन्दः कुवेरो देवता कुवेरावा० । ओं वय ꣳसोम व्रते तवमनस्तनूषु बिभ्रतः प्रजावन्तः सचेमहि भू० इति ‡कुवेरम् । तमीशानेत्यस्य गौतम ऋषि जगती छन्दः ईशानो देवता ईशानावा० । ओं तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयं पूषानो यथा वेद साम सद्वृधे रक्षिता पायुरदब्धः स्वस्तये भू० ईशा० §इतीशानम् । ब्रह्मयज्ञान मिति ‖ब्रह्माणं नमोस्तु

---

[*] पश्चिम दलाग्रे ।

[†] वायु दलाग्रे ।

[‡] उत्तर दलाग्रे ।

[§] ईशान दलाग्रे ।

[‖] ईशानद्रयोर्मध्ये ।

सर्पेभ्यारिति *सर्पान् इति सर्पानावाह्य मनोजूति र्जुषता मिति प्रतिष्ठाप्य । ओं सूर्य्याय नमः पाद्यमर्घ्य माचमनीयं स्नानं गन्धाक्षत पुष्पाणि धूपो दीपश्च नैवेद्यं समर्पयामि एवं सर्वान् पूजयेत् । प्रार्थना ब्रह्मा मुरारि स्त्रिपुरान्तकारि र्भानुः शशि भूमि सुतो बुधश्च गुरुश्च शुक्रः शनि राहु केतवः सलोकपालाः शुभदा भवन्तु । ओं ध्रुवाय नमः इति ध्रुवं अथ †कलश स्थापनं आपोहिष्ठेत्यस्य सिन्धु द्वीप ऋषि गायत्री छन्दः आपो देवता

---

*नैर्ऋति वरुणयोर्मध्ये ।
ओं सप्तर्षिभ्यो नम इति ऋषीन् ।
सप्तर्षिश्च ध्रुवंचैवोत्तरस्यां लिखेद्बुधः इति मदनरत्ने ।
क्षेत्रपालं नराकार मगस्त्यं कलशाकृतिं इति मदनरत्ने ।
ओं क्षेत्रपालाय नमः इति क्षेत्र पालं ।
ओं अगस्त्याय नमः इति अगस्त्यं ।

†बहवा आधुनिक ग्रन्थकर्तारः स्व स्व ग्रन्थेषु कलश स्थापनं ग्रह स्थापनात् प्राग्लिखित वन्त स्तन्न युक्तं कुतः शौनकेनोक्तं स्वग्रन्थे ग्रहानन्तरं कलश स्थापनं कार्य्यं तच्च वाक्यं देवपूजोत्तरे काले ततः कुम्भानुमन्त्रणमिति शौनक अतएवास्यां तदनन्तरं कलशाभिमन्त्रणं मया लिखितं ।

पञ्चांगुल वैपुल्य मुत्सेधः षोडशांगुलः कलशानां प्रमाणन्तु मुख मष्टांगुलं भवेत् रुद्र कुम्भं सरत्नञ्च सवस्त्रं च सपल्लवं तीर्थोदकेन सम्पूर्णं सर्वौषधि समन्वितं पुष्प चन्दन संयुक्तं पीठस्येशानतो न्यसेत् प्रयोगरत्ने व्रतराजे च ।

धातुजं मृण्मयं वापि कलशं यत्प्रतिष्ठितं तद्वत् प्रादेश दीर्घं च चतुरंगुल मुच्छ्रितं सित तण्डुल पूर्णेन पात्रेण पिहिताननं इति संस्कार भास्करे ।

भूमि प्रोक्षने विनियोगः । ओं आपोहिष्ठा मयोभुव स्तान ऊर्जे दधातन महेरणाय चक्षसे योवः शिवतमोरसः तस्य भाजयते हनः उशतीरिव मातरः तस्मा अरङ्ग मामवो यस्य क्षयाय जिन्वथ आपो जन यथाचनः इति भूमि प्रोक्षणं । महीद्यौ रित्यस्य मेधातिथि ऋषि गायत्री छन्दः द्यावा पृथिव्यौ देवते भूमि स्पर्शने विनियोगः ओं महीद्यौः पृथिवी चन इमं यज्ञं मिमिक्षतां पिपृतान्नो भरीमाभिः इति भूमि स्पर्शनं । ओषधय इत्यस्याथर्व पुत्र भिषग्राषि रनुष्टुब्छन्दः ओषाधि र्देवता यव प्रक्षेपणे विनियोगः । ओं ओषधयः सम वदन्त सोमेन सह राज्ञा यस्मै कृणोति ब्राह्मणस्तँ राजन्पापारयमसि इति यव प्रक्षेपः। ओं धान्य मसि धिनुहि देवान् प्राणायत्वो दानायत्वा दीर्घामनु प्रसिति मायुषेधान्देवोवः सविता हिरण्य पाणिः प्रतिगृभ्णात्व छिद्रेण पाणिना चक्षुषे त्वा महीणां पयोसि इति धान्य प्रक्षेपः । आजिघ्र कलश इत्यस्य कुसुरु विन्दुः ऋषि र्महा पंक्ति छन्दः गौर्देवता कलश स्थापने विनियोगः । ओं आजिघ्र कलशं मह्यात्वा विशात्विंदवः पुन रूर्ज्जा निवर्तस्व सानः सहस्त्रं धुक्ष्वोरुधारा पयस्वतीः पुनर्मा विशताद्रयिः इति कलशं निधाय । ओं इमं मे गङ्गे यमुने सरस्वति शतद्रु स्तोमं सचता पुरुष्ण्या असिक्न्या मरुद्वृधे वितस्त यार्जी कीये श्रृणुह्या शिषो मया इति तीर्थोदकेन पूरयेत् । ओं वरुण स्योतंभनमसि वरुणस्य स्कम्भ सर्जनीस्थो वरुणस्य ऋत सदन्यसि वरुणस्य ऋत सदन मसि वरुणस्य ऋत सदन मासीद इत्यन्य जलेन पूरयेत ओं गन्ध द्वारां दुरोधर्षां

नित्य पुष्टां करीषिणीं ईश्वरीं सर्वं भूतानां तामिहोपह्वये श्रियम्। इति गन्धम्॥ या ओषधि इत्यस्य अथर्वपुत्र भिषगृषि रनुष्टुप्छन्दः ओषधी देवता सर्वौषधी प्रक्षेपे विनियोगः। ओं या ओषधीः पूर्वाजाता देवेभ्यः त्रियुगं पुरा मनेनैव भ्रूणा मह ँ शतंधामानि सप्तच। इति *सर्वौषधीः॥ तत्सवितुरित्यस्य विश्वामित्र ऋषि गायत्री छन्दः सावित्री देवता पञ्च गव्य प्रक्षेपे विनियोगः। ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो योनः प्रचोदयात्। इति †पञ्चगव्यम्॥ आप्यायस्वेत्यस्य गौतम ऋषिः सोमो देवता गायत्री छन्दः क्षीर प्रक्षेपे विनियोगः। ओं आप्यायस्व समेतुते विश्वतः सोम वृष्ण्यम् भवा वाजस्य संगथे इति क्षीरम्॥ दधि क्राव्ण इत्यस्य दधिक्राव्ण ऋषिः अश्वो देवता अनुष्टुप्छन्दः दधि प्रक्षेपे वि०। ओं दधिक्राव्णो अकारिषं जिष्णो रश्वस्य वाजिनः सुरभिनो मुखा करत्प्राण आयू ँ षितारिषत्। इति दधि॥ ओं घृत वती भुवनानामभि श्रियोर्वीपृथिवी मधु दुघे सुपेशसा द्यावा पृथिवी वरुणस्य धर्म्मणा विष्कंभिते अजरे भूति रेतसा। इति घृतम्॥ ओं मधुवातेत्यस्य गौतम ऋषिः विश्वेदेवा देवता गायत्री छन्दः मधु प्रक्षेपे विनियोगः। ओं मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः माध्वीर्नः

---

*कुष्टं १मांसी हरिद्रे द्वे २मुरा ३शैलेय चन्दनं वचा चम्पक मुस्ताच्च सर्वौषध्यो दश स्मृताः।
१छड़गुड़ी २मोंडों वा बाला ३शिलाजीत।

†गोशकृत् द्विगुणं मूत्रं सर्पिदद्याच्चतुर्गुणं क्षीरमष्ट गुणं प्रोक्तं पञ्च गव्ये तथा दधि।

संत्वोषधीः मधुनक्क मुतोषसो मधुमत्पार्थिवꣳरजः मधु द्यौ रस्तुनः पिता मधुमान्नो वनस्पति र्मधुमाँऽअस्तु सूर्यः माध्वीर्गावो भवन्तुनः । इति मधुः ॥ ओं अपाꣳ रसमुद्वयसꣳ सूर्य्ये सन्तꣳ समाहितम् । अपाꣳ रसस्ययो रसस्तंवो गृह्णाम्युत्तममुपयाम गृहीतोसीद्रायत्वाजुष्टं गृह्णाम्येषते योनिरिंद्रायत्वा जुष्टतमम् । इति शर्करा ॥ ओं कांडादिति मन्त्रस्याग्निर्ऋषि रनुष्टुब्छन्दः दूर्वा देवता दूर्वा प्रक्षेपे विनियोगः । ओं काण्डात्काण्डात् प्ररोहन्ती परुषः परुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च । इति दूर्वाः ॥ ओं शरासः कुशरासो दर्भासः सौर्य्या उत्तमोजा अदृष्टा वारिणा सर्वे साकतिजस्य । इति कुशा ॥ अश्वत्थेवो निषदनं पर्णे वो वसतिष्कृता गोभाज इत्किलासथ यत्सन वथ पूरुषम् । इति *पञ्च पल्लवान् । स्योना पृथिवीत्यस्य मेधातिथि ऋषिः पृथिवी देवता गायत्री छन्दः सप्त मृत्तिका प्रक्षेपे विनियोगः । ओं स्योना पृथिवीनो भवानृक्षरानिवेशनी यच्छानः शर्म्म सप्रथाः । इति सप्त †मृत्तिका ॥ ओं या फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः बृहस्पति प्रसूता स्तानो मुञ्चत्वꣳहसः इति फलम् । ओं परिवाजेत्यस्य सोम ऋषिः अग्नि र्देवता गायत्री छन्दः

---

*अश्वत्थोदुम्बर प्लक्षचूतन्यग्रोध पल्लवाः ।

†अश्वस्थाना द्गजस्थानाद्वल्मीकात्संगमाद् ह्रदात् राजद्वाराच्च गोष्ठाच्च मृदमानीय निक्षिपेदिति ।

संस्कार भास्करे ।

[*]पञ्चरत्न प्रक्षेपे विनियोगः । ओं परिवाजपतिः कविरग्निर्हव्यान्य क्रमीत् दधद्रत्नानिदाशुषे । इति पञ्चरत्नम् ॥ ओं हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम । इति हिरण्यम् ॥ ओं सजातो ज्योतिषा सह शर्म्म वरुथमासदत्स्वः वासो अग्ने विश्वरूप ꣳ संवयस्व विभावसो । इति कलशस्य मुखे वासो रक्तसूत्रं वा बध्नीयात् । ओं पूर्णादर्विपरापतसुपूर्णा पुनरापत वस्नेव विक्रीणावहा इषमूर्ज ꣳ शतक्रतो ॥ इति कलशोपरि धान्यपूर्ण पात्रं निदध्यात् । तत्वायामीत्यस्य शुनःशेफ ऋषिः त्रिष्टुप्छन्दः वरुणो देवता ओं वरुणावाहने विनियोगः । ओं तत्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणे हवो ध्युरुष ꣳ समान आयुः प्रमोषीः । इति वरुणमावाह्य [†]पूजयित्वा च प्रार्थयेत् गङ्गे च यमुने चैव गोदावरी सरस्वती नर्मदे सिन्धु कावेरी जलेस्मिन्सन्निधिं कुरु सर्वे समुद्रा सरितस्तीर्थानि जलदानदाः । आयांतु यजमानस्य दुरितक्षय कारकाः । ततः कलशाभि मन्त्रणं कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृ गणाः स्मृताः । कुक्षौतु सागराः सप्त सप्त द्वीपा वसुन्धरा

---

[*] कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम् इति पञ्च रत्नं ।

[†] ओं वरुणाय नम इति गन्धादिना ।

ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः। अङ्गैश्च सहिताः सर्वे कलशंतु समाश्रिताः। देवदानव सम्वादे मथ्यमाने महोदधौ। उत्पन्नोसि तदा कुम्भ विधृतो विष्णुना स्वयं। त्वत्तोये सर्व तीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः। शिवः स्वयं त्वमेवासि विष्णुस्त्वञ्च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः। त्वयि तिष्ठंति सर्वेपि यतः काम फल प्रदः। त्वत्प्रसादादिम यज्ञं कर्तुमीहे जलोद्भव। सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा। इति कलश स्थापनं॥

अथ कुष्कण्डिका प्रारम्भः—तत्र पूर्व मिध्मा बर्हिषो *सन्नहनं कृत्वाग्निं परिसमुह्य परिस्तृणीत् तच्चेत्थं अग्न्याय तानादष्टांगुल मिति देश ऐशानीं दिशमारभ्य प्रदक्षिणां

---

*तच्चेत्थं प्रादेशमात्रान्पञ्च त्रिंशद्दर्भान् रज्जुकरणार्थं गृहीत्वा तत्र द्वादश दर्भैः सन्धित यवनां रज्जुं प्रादक्षिण्येन कृत्वा पुनरण्यां एवं रज्जुद्वयं गृहीत्वा तद्रज्जु द्वयं सप्रादक्षिण्येन सामन्याग्रां वितत्य तत्र प्रादेश मात्रान् मुष्टि परिमितान्दर्भान्निधाय तया रज्ज्वातान् दर्भान् द्विरावेष्ट्य रज्ज्वग्रेण तद्रज्जू मूलं सकृदावेष्ट्यं तद्रज्ज्वग्र शेषं पूर्वमावेष्ट्य रज्ज्वधस्ता त्रिर्वीयाग्निमिदं मे सदायतनस्य पश्चाद्भागमुपरि निदध्यात् ततः पूर्वं वदन्यां त्रिवृत्ती रज्जुं कृत्वा दगग्रां वितत्य तत्र पलाश खदिराद्यन्यतमयज्ञिय वृक्षस्य द्विप्रादेश प्रमाणं पञ्चदश समिदात्मिक मिध्मं प्रागग्रं निधाय तया रज्ज्वा सकृदा बध्यायतनस्य पश्चाद्भागे उपरि निधापयेत्।

समन्तात्सोदकेन पाणिना त्रिः परिमृज्य *परिस्तृणीयात् । †आग्नेयादीशान्तं—ब्रह्मणोग्नि पर्यन्तं नैर्ऋत्याद्वायव्यान्तं अग्नितः प्रणीता पर्यन्तं ततोग्नेर्दक्षिणतो ब्रह्मासनार्थं मुत्तरश्च पात्रा सादनार्थं कांश्चिन्दर्भान् प्रागग्रानाग्ने स्थंडलतः प्रादेश मात्र परिमिते देश आस्तृणीयात् अग्नेरीशानतः त्रिरम्भसापरिषिच्य उत्तरास्तीर्णेषु दर्भेषु दक्षिण सव्य पाणिभ्यां क्रमेण ‡चरुस्थाली §प्रोक्षिण्यौ दर्वी ‖स्रुवौ, ¶प्रणीताज्य**पात्रे ††इध्मा

---

*वेदिका वस्त्र हीनाच नग्ना सम्प्रोच्यते बुधैः । पदिस्तीर्य्य ततो दर्भैः परिदध्यादिमां बुधाः ।

†तत्र प्राच्यां प्रतीच्यां चोदग्रादर्भा अवाच्या मुदीच्यांच प्रागग्राः पूर्व पश्चात्परिस्तरण मूलयोरुपरि दक्षिण परिस्तरणं उत्तर परिस्तरणंतु तदग्र योरधस्तात् कार्य्यं इति संस्कार भास्करे ।

परिस्तरणे वहवा आधुनिक ग्रन्थ कर्तारः स्व स्व निर्मित ग्रन्थेषु परिस्तरणं दर्भ संख्यां लिखितवन्तः कुत्रच तच्चपरिस्तरणं षोडशभि दर्भैः कार्य्यमिति प्रतिदिशं कुत्र च त्रिभिः दर्भैः प्रतिदिशमिति तन्नयुक्तं कुतो वर्हिदर्भ मुष्टिरिति संस्कार भास्करे ।

ते च दर्भा अनियत संख्या एकैकस्यां दिशि इति प्रयोग रत्ने ।

ब्रह्मासन मास्तीर्य्य प्रणीय परिस्तीर्य्यार्थवदा साद्येति गृह्यसूत्रे कथनादपि सख्यायां अभाव एव प्रतीयते अतएवा नियताः स्थाप्याः संख्यया परिस्तरण मन्यशा खीय विषयकं ज्ञेयं नतु वाजसनेयि विषयकं ।

‡तैजसी मृण्मयी वा द्वादशांगुल विशाला प्रादेशोच्चा ।

§द्वादशांगुल दीर्घं करतल संमितखातं कमलं पत्राकृति ।

‖हस्त मात्रो गुष्ट पर्व मात्र खात परिणाहवर्तुल पुष्करः ।

¶द्वादशांगुल दीर्घं चतुरंगुल विस्तारं चतुरंगुल खातं उत्तरे पूर्णं पात्र मपि स्थाप्यं तच्चाष्टमुष्टि भवेत् किञ्चित्किञ्चिदष्टौच्च पुष्कलं पुष्कलानिचत्वत्वारि पूर्ण पात्रं विदुः बुधः ।

**तैजसी मृण्मयी वाज्यस्थाली ।

††तिस्रः पालाश्यः प्रादेश मात्राः ।

वर्हिषी इति द्वन्दशउदगपवर्गं प्राक्संस्थंच न्युब्जानि पात्राण्या सादयेत् ततः *प्रोक्षणी पात्र मुत्तानं कृत्वा प्रादेश मात्र कुशद्वय रूपे पवित्रे निधायाद्भिस्तत् पात्रं पूरयित्वा तत्र गन्ध पुष्पाक्षतान्निक्षिप्यांगुष्ठो पकनिष्ठिकाभ्या मुदग्रे पृथक् पवित्रे धृत्वा ऽपस्त्रिरुत्पूय पात्राण्युतानानि कृत्वा इध्मञ्च विस्रस्य सर्वाणि पात्राणि त्रिः †प्रोक्षता आपः किञ्चित्कमण्डलौ क्षिपेदित्येके प्रणीतापात्र मग्रे प्रत्यङ् निधाय तत्रतेपवित्रे निधायोदकेन पूरयित्वा गन्ध पुष्पाक्षतान्निक्षिप्य ब्रह्म पक्षे अग्निरुत्तरतः प्राङ्मुख मासीनं स्वयं मुदङ् मुख आसीनो नुलेपन पुष्प माल्य वस्त्रालङ्कारादिभिः संपूज्यामुक कर्म महं करिष्ये तत्र मे यज्ञे अमुक गोत्रामुक शर्म्मन् ब्राह्मणत्वं ब्रह्मा भवेति वृत्वा भवामीत्युक्तवन्तं पूर्वतो नीत्वाग्ने दक्षिणस्यां प्रादेश मात्र परिमित देशे कल्पितासने उपवेशयेत् सच तूष्णीं दणित उदङ् मुखः आसनान्तृण निरसनञ्च कुर्य्यात् अंगुष्ठानामिकाभ्यां गृहीत्वा परावसु रिति नैर्ऋत्यां त्यजेत् कर्मज्ञ ब्राह्मणाभावे पञ्चाशत्कुश निर्मितं ब्रह्माणं स्थापयेत् ततः कर्ता प्रणीतापात्रं दक्षिणोत्तराभ्यां पाणिभ्यां नासिका समीपं नीत्वोत्तरतोग्ने र्निधायान्यैर्दर्भै

---

*अनन्त गर्भकं साग्रं कौशं द्विदल मेवच प्रादेश मात्र विज्ञेयं पवित्रं यत्र कुत्रचित्। पवित्र करणं छेदार्थं पवित्र छेदनार्थं कुशत्रयं पवित्र करणार्थं कुशद्वयं अनन्तर्गर्भकं साग्रं द्वयोरुपरि त्रीणि निधाय द्विमूलेन द्वौ कुशौ प्रदक्षिणी कृत्य सव्याग्युगद्धृत्या अनामिकांगुष्ठाभ्यां छित्वा तान् कुशानुत्तरतः क्षिपेत्। इन्द्र वज्रं विष्णु चक्रं यस्तु दण्ड त्रिशूलकं दर्भरूप तया त्रीणि पवित्र छेदनानिच। संस्कार भास्करे।

†दृष्टि दोष विनाशार्थं पात्राणां प्रोक्षणं स्मृतम्।

राच्छादयेत् ते पवित्रे आज्य पात्रे निधायतत्पात्रं पुरतः संस्थाप्य तस्मिन्नाज्य मासिच्य परिस्तरणाद्बहिरुत्तरतोगांरानपोह्य *तदुपर्याज्य पात्रं निधाय ज्वलता दर्भोल्मुकेनावज्वाल्य दर्भाग्र द्वयं निक्षिप्य पुनः तेनैवोल्मुकेन प्रधान द्रव्य सहितं आज्यं त्रिः पर्यग्नि कृत्वा तदुल्मुकं निरस्यापः स्पृष्ट्वाऽङ्गारानग्नौ क्षिपेत् अंगुष्ठोपकनिष्ठिकाभ्यां पवित्रे गृहीत्वा सवितुष्ट्वा प्रसवेति मन्त्रस्य हिरण्यस्तूप ऋषिः सविता देवता पुर उष्णिक् छन्दः आज्यस्योत्पवने विनियोगः ओं सवितुः त्वा प्रसव उत्पुनाम्य छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति मन्त्रेण प्रागुत्पुनातिसकृत् द्विस्तूष्णीं तेपवित्रेऽद्भिः प्रोक्ष्याग्नौ प्रहरेत् स्कन्दाय स्वाहा स्कन्दायेदं नममेति ततः आत्मनोऽग्रतो भूमिं प्रोक्ष्य तत्र वर्हि सन्नहनीं रज्जुमुदग्रां प्रसार्य्य तस्यां वर्हि रास्तीर्य्य तदुपरि आज्य †पात्रं निधाय स्रुव सम्मार्जन कुशान् वामहस्ते गृहीत्वा स्रुक् स्रुवौ च दक्षिण हस्तेन गृहीत्वाग्नौ प्रताप्य दर्वौ निधाय स्रुवं वामहस्ते गृहीत्वा दक्षिण हस्तेन स्रुव विलंदर्भाग्रै स्त्रिःसंमृज्य तथैव स्रुव पृष्ठं दर्भाग्रै रात्माभिः मुखं त्रिः संमृज्य कुश मूलैर्दंडस्याधस्तात् विलपृष्ठा

---

*दक्षिणस्यां दानवाद्याः स्थिता यज्ञस्य वारदत्तेभ्यः संरक्षणार्थं ब्रह्माणं तद्दिशिन्यसेत्।

†आज्युमुद्वास्य आज्यमुत्थाप्य चरोः पूर्वेण नीत्वाग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्याज्यस्य पश्चिमतो नीत्वाज्य स्योत्तरतो निधाय आज्य मग्नेः पश्चादानीय चरूश्चानीयाज्यस्योत्तरतो निधापयेत् एवमेव त्रिचतुरादीनन्यान्यपि हवींष्युद्वासयेदिति हरिहरः।

दारभ्य यावदुपरिष्टा द्विलंतावत् त्रिः संमृज्याद्भिः प्रोक्ष्य *प्रताप्य घृतादुत्तरतः स्थापयेत् पुनः तथैव स्रुचं संमृज्य प्रोक्ष्य प्रताप्य स्रुवोत्तरतः स्थापयेत् दर्भानद्भिः क्षालयित्वाग्नौ प्रहरेत् स्रुवेणाज्यं गृहीत्वा होम द्रव्य मभिधार्य्य उदगुद्वास्याग्न्याज्ययो र्मध्येन नीत्वाऽऽज्याद्दक्षिणतो वर्हिषिसांतरमासाद्य ततो विश्वानिन इति तिसृणां वसुश्रुतो ऋषि रग्नि र्देवता त्रिष्टुप्छन्दः द्वाभ्यामर्चने ऽन्त्ययोपस्थाने विनियोगः विश्वानिनो दुर्गहा जातवेदः सिन्धुं ननावा दुरितातिपर्षि अग्ने अत्रिवन्नमसा गृणानः अस्माकं वोध्यविता तनूनाम् यस्त्वा हृदा कीरिणा मन्यमानः अमर्त्यं मर्त्यो जोहवीमि जातवेदो यशो अस्मासुदेहि प्रजाभिरग्ने अमृतत्व मश्याम् यस्मैत्वं सुकृते जातवेद उलोकमग्ने कृष्ण वस्योनं अश्विनं सपुत्रिणं वीरवन्तं गोमन्तंरयिं नशते स्वस्ति इति अष्ट दिक्षु गन्ध पुष्पादिभिरग्नि मभ्यचर्यात्मानं चालं कृत्य एकयोपस्थाय ततः पाणिनेध्म मादाय मूल मध्याग्रेषु त्रिरभिवार्य्य स्रुवेण मूल मध्ययोर्मध्य भागे गृहीत्वा अयन्त इध्मेति मन्त्रस्य वामदेव ऋषिः जातवेदाग्निर्देवता त्रिष्टुप्छन्दः इध्म †हवने विनियोगः ओं अयन्त इध्म आत्मा जातवेद स्तेनध्यस्व वर्द्धस्व चेद्धवर्द्धय चास्मान्प्रजया पशुभिर्ब्रह्म वर्चसेनान्नाद्येन

---

*अग्रेहुतेन वैधव्यं मध्ये चैव प्रजा क्षयः मूलेनम्रियते होता तेन तापन मीरितम्।

†इध्म हवनं त्रिःसप्त पञ्च वा परिमितामुपयमन कुशान् वेणी रूपान् वामहस्ते कृत्वा कार्य्यम्।

समेधय स्वाहेतीध्म मग्नावाधाय अग्नये जातवेदस इदं नममेति त्यजेदिति अग्नीशानादि उदग पवर्गं परिषिच्य जुहुयात् कुशेन ब्रह्मणान्वारब्धः तत्राघारादारभ्य द्वादशाहुतिषु तत्तदा हुत्यन्नन्तरं स्रुवाग्रस्थित हुत शेषस्य प्रोक्षणी पात्रे प्रक्षेपः ततो *होमः सामिध द्रव्य मादायाद्येह निर्दिश्य यक्ष्यमाण ग्रह देवता परिग्रहार्थं मन्वाधानं करिष्ये अस्मिन्वहितेग्नौ आधाराद्याज्येन प्रधान देवता मादित्य मधि देवता मग्नि प्रत्यधि देवं रुद्रमर्कस मिच्चर्वाज्यैः प्रधान देवं सोम मधि देवता मपः प्रत्यधि देवतां गौरीं पलाश समिच्चर्वाज्यैः प्रधान देवता मङ्गारक मधि देवतां भूमिं प्रत्यधि देवतां स्कन्दं खदिर समिच्चर्वाज्यैः प्रधान देवं बुधमधिदेवं विष्णुं प्रत्यधि देवं विष्णु मपामार्ग समिच्च वीज्यैः प्रधान देवं वृहस्पतिं अधिदेव मिन्द्रं प्रत्यधि देवं व्रह्माणं अश्वत्थ समिच्चर्वाज्यैः प्रधान देवं शुक्रं अधि देवता मिन्द्राणी प्रत्यधि देव मिन्द्रं औदुम्बर समिच्चर्वाज्यैः प्रधान देवं शनिं अधिदेवं प्रजापतिं प्रत्यधि देवं यमं शमीचर्वाज्यैः प्रधान देवं राहुं अधि देवं सर्पं प्रत्याधि देवं कालं दूर्वासमिच्चर्वाज्यैः प्रधान देवं केतुं अधिदेवं व्रह्माणं प्रत्याधि देवं चित्रगुप्तं कुश चर्वाज्यै र्विवक्षित संख्याकैः पार्श्वदेवता प्रधान दशांशेन

---

*होमे मुद्रा त्रयं प्रोक्तं मृगी हंसीच शूकरी शूकरी करसंकोची हंसी मुक्त कनिष्ठिका मृगी कनिष्ठास्तर्जन्यौ मुद्राः तिस्र इतीरताः अभिचारे शूकरी स्यात् मृगी हंसी शुभात्मकै।

कर्म साद्गुण्य देवता विनायकं दुर्गां क्षेत्रपालं वायुमाकाश मश्विनौ क्रतु संरक्षक देवताः इन्द्र मग्निं यमं निर्ऋतिं वरुणं वायुं कुवेर मीशानं प्रधानं विंशांशेन अग्निं वायुं सूर्य्यं प्रजापतिं प्रभूत तिल व्रीहिभिर्विवक्षित संख्यया सूर्य्य *माज्येन त्रयोदश वारं अग्निं चतुस्त्रिंशद्वारं रुद्रं द्वात्रिंशद्वारं शेषेण स्विष्ट कृत मित्यादि सद्यो यक्ष्ये। इति प्रक्षिपेदग्नौ

---

*होम द्रव्य मान सिद्धान्त शेखरे १ कर्ष प्रमाण माज्यंस्यान्मधु क्षीरं च तत्समं तण्डुलानां। शुक्ति मात्रं पायसं प्रसृतेः समं कर्ष मात्राणि भक्ष्याणि लाजामुष्टिमिता मताः।

अन्नं ग्रास समं ग्राह्यं शाकं ग्रासार्द्ध मेवच मूलानांतु त्रिभागः स्यात् कन्दानामष्टमोंशकः इक्षुः पर्व प्रमाणं स्यात् अंगुल द्वितयं लता।

प्रादेश मात्रा समिधो व्रीहीणां चांजलिः समः तिल सक्तूकणादीनां मृगीमुद्रा प्रमाणतः तत्र पुष्प फलादीनां प्रमाणाहुति रिष्यते चन्द्र श्रीखण्ड कस्तूरी कुंकमा गुरु कर्दमा। हरिमन्थ समा प्रोक्ताः गुग्गुलुर्वद रोपमः।

व्रीहयो यव गोधूम प्रियंगु त्तिल शालयः स्वरूपेणैव होतव्य इतरेषांच तण्डुलाः।

द्रवः स्रुवेण होतव्यः पाणिना कठिनं हविः स्रुव पूर्णाद्रवाः प्रोक्ताः कठिना ग्रास मात्रकाः।

समिधं मूलतो द्व्यंगुलं विहाय मध्यमानामिकांगुष्ठैर्गृहीत्वा जुहुयात्चरुं ग्राससमं पाणिनैवाज्यं स्रुवेण तदभावे अश्वत्थ पर्णेन।

उक्तानि पञ्च गव्यानि शुक्ति मात्राणि साधुभिः।

फलार्थं गुडमानञ्च शर्करापि तथा विधा एकंस्यात्पत्र पुष्पञ्च तथा धूपादि कल्पयेत् अष्टधा नारिकेलञ्च चतुर्धा कदली फलं लवणं शुक्ति मात्रंस्यान्मरीचान्येक विंशतिः। द्रव्याभावे प्रतिनिधि र्हैमाद्रौ दध्यालाभे पयोग्राह्यं

ततः स्रुवेणाज्यं गृहीत्वा वायवीं दिशमारभ्याग्नेयी पर्य्यन्त माज्य धारां जुहुयात् प्रजापतये स्वाहेति मनसा ध्यायेत् तथैव निर्ऋति दिशमारभ्येशान् दिक् पर्य्यन्तं आज्यधारां जुहुयात् उभयत्र प्रजापतय इति नममेति त्यजेत् तत उत्तरे अग्नये स्वाहेदमग्नये। दक्षिणे सोमाय स्वाहेदं सोमायेत्याज्य भागौ आकृष्णेति मन्त्रस्य हिरण्यस्तूप ऋषिः सविता देवता त्रिष्टुब्छन्दः अर्क समिच्चर्वाज्य सम्पादित द्रव्येण सूर्य्य प्रीत्यर्थे होमे विनियोगः। आकृष्णेति० इदं सूर्य्याय नमम अनेन श्री सूर्य्यो देवता प्रीतोस्तु। इति हवनान्ते जल मुत्सृजेत् प्रार्थयेच्च सहस्र किरणः श्रीमान्सप्ताश्वो लोक बांधवः। भक्तानां वरदो

मध्वालाभे तथा गुड घृते प्रतिनिधिः कार्य्यः पयोवादधिवान्नृप।

अशीति गुंजाभिः तुलितं गुञ्जा पञ्चाद्य माषकः ते षोडशाक्षः कर्ष इति।

पाणिर्निकुब्जः प्रसृतिः।

तर्जनी सहितांगुष्ठे विस्तृते प्रादेशः प्रादेशतालगो कर्णास्तर्जन्यादि युतेतले।

हरिमन्थः चणकः।

कर्ष द्वयं पलं कर्ष चतुष्टयं।

आज्य होमेषु सर्वेषु गव्यमेव घृतं भवेत् तदभावे माहिष्यास्तु आजमाविक मेवच तद भावेतु तैलस्या तद भावेतु जार्तिलं तदभावेतु कौसुम्भं तदभावेतु सार्षपं। संस्कार भास्करे।

*भानुः प्रीतो भवतु भास्करः। इमम्मेति मन्त्रस्य गौतम ऋषिः द्विपदा विराट् छन्दः सोमो देवता पलाश समिच्चर्वाज्यैः सोम प्री० ओं इमं दे० सोमाय नमम अनेनहो० ओं बृद्धिर्यस्य सिते पक्षे सुराणाममृतंतुयः। सम्पूर्ण मण्डलो बालः ससोमः प्रीयतां मम। अग्निमूर्द्धेति मन्त्रस्य विरूपाक्ष ऋषि गायत्री छन्दः भौमो देवता भौम प्रीतये धूम्रकेत्वग्नौ खदिर समिच्चर्वाज्यहो० ओं अग्निमू० इदं भौमायन० अनेन० भूमिपुत्रो महातेजो वह्निरूपो महाबलः ग्रहाणा मधिपः श्रेष्ठः सभौमः प्रीयतां मम। ओं उद्बुद्ध्यस्वेति मन्त्रस्य परमेष्ठी ऋषिः, त्रिष्टुब्छन्दः, बुधो देवता बुध प्रीतये जाठराग्नौ अपामार्ग समिच्चर्वाज्यहो० ओं उद्बुद्ध्य० इदं० अनेन सिंहासनस्थो वरदः कार्णिकार समद्युतिः खड्ग चर्म गदा पाणिः सबुधो वरदोस्तुमे। बृहस्पते इति मन्त्रस्य गृत्समद ऋषिः, त्रिष्टुब्छन्दः, बृहस्पतिर्देवता बृहस्पतिप्री० शिखिनामाग्नौ अश्वत्थ समिच्चर्वाज्य हो० ओं बृहस्पते० अने० दण्डाक्ष सूत्र धारीच कमण्डलु धरस्तथा पीतवर्णश्चतुर्बाहुः

---

*सूर्य्यादीनां प्रधान देवतानां अष्टौ आहुतयः शांतिकमलाकरे संस्कार भास्करे च।

अर्कः पलाशः खदिरस्त्वपामार्गोथ पिप्पलः औदुम्बरं शमी दूर्वा कुशश्च समिधः क्रमात। याज्ञवल्क्यः।

कर्म्म प्रदीपे, नांगुष्ठादधिका कार्य्या समित्स्थूल तया क्वचित्। नवियुक्त त्वचाचैव नस कीटानस्फाटिता। प्रादेश मात्रान्नाधिका नतथा स्याद्द्विशाखिका नसपर्णा समित्काया होमकर्म्मसु जानता प्रागग्राः समिधो ग्राह्या अखर्वानेत्र फाटिताः। काम्येषु वश्य कर्म्मादौ विपरीता जिघांसवः विशीर्णा विफला ह्रस्वा वक्रा वहु शिखा कृशा दीर्घाः स्थूलाघु नैर्जुष्ठाः कर्म सिद्धि विनाशकाः।

१नेत्रं जरा मूलं।

पातुनोवाक्यतिर्भृशं। ओं अन्नात्परि० इति मन्त्रस्य भरद्वाज ऋषिः क्षुक्रो देवता जगती छन्दः शुक्रप्री० हाटकनामाग्नावौदुम्बर समिच्चर्वाज्यहो० ओं अन्नात्परि० अनेन० श्वेतवर्ण श्चतुर्बाहु साक्षसूत्र कमण्डलुः सरस्वत्याः परंधाम शुक्रो भूयाद्वर प्रदः। शन्नो देवीति मन्त्रस्य सिन्धुद्वीप ऋषिः गायत्री छन्दः शनिर्देवता शनिप्री० महा तेजाग्नौ शमी सामिच्चर्वाज्यहो० ओं शन्नो देवी० अनेन भिन्ननीला ञ्जनप्रक्षो वरदो गृध्रवाहनः। धनुः शूल शरैर्भीमः सदा शत्रु प्रमर्द्दनः मुनीन्द्रै ऋषिभिः साध्यैः सिद्धैश्चैव नमस्कृतः पातुनोर्क सुतः श्रीमान् ग्रहैस्सर्वैः सुपूजितः॥ ओं कयान इति मन्त्रस्य वामदेव ऋषिः राहुर्देवता गायत्री छन्दः राहुप्री० हुताशनाग्नौ * दूर्वा समिच्चर्वाज्यहो० ओं कयानश्चि० अनेन चन्द्रार्कौ ग्रसतेयस्तु भीमः पर्वणि पर्वणि राहुः सदानव श्रेष्ठः सर्वदा प्रीयतां मम। ओं केतुमितिमं० मधुछन्द ऋषिः केतवो देवता गायत्री छन्दः रोहिताग्नौ † कुशसमिच्चर्वाज्यहो० ओं केतुंकृण्व० अनेन० पीड्यन्ते पीडया यस्य देव गन्धर्व किन्नराः सकेतु धूम्रवर्णाभः प्रीतो भवतु सर्वदा ‡ ततोधिदेवता होमः त्र्यम्बक मिति मन्त्रस्य वशिष्ठ ऋषिः अनुष्टुब्छन्दः रुद्रो देवता पलाशसमिद्धो० ओं त्र्यम्बक० इदं रुद्राय नमम श्रीश्चतेति

---

*तिसृभि दूर्वाभिरेकाहुतिः इति संस्कार भास्करे।

†कुशेषु त्रिपत्रैणैकाहुतिरिति संस्कार भास्करे।

‡अधि देवानामपि अष्टा वाहुतयो दयाः शांतिकमलाकरे।

नारायण ऋषिः त्रिष्टुब्छन्दः उमा देवता उमा प्रीतये पलाश समिद्धो० ओं श्रीश्चते लक्ष्मी० इदं श्रियै यदक्रन्द इति भार्गव जमदग्नि दीर्घ तमस ऋषिः त्रिष्टुब्छन्दः स्कन्दो देवता स्कन्दप्री० पलाश० ओंयदक्रन्द० इदंस्कन्दा० विष्णोरराटमिति प्रजापतिर्ऋ०यजुः छं० विष्णुर्देवता पला० ओंविष्णोररा० इदं विष्ण० ओं ब्रह्मयज्ञानमिति ब्रह्म ऋषिः त्रिष्टुब्छन्दः ब्रह्मा देवता ब्रह्मप्री० पला० ओंब्रह्मयज्ञा० इदं ब्रह्मणे सजोषा इन्द्र इति परमेष्ठि ऋषिः जगती छन्दः इन्द्रो देवता इन्द्रप्री० पला. ओं सजोषा इन्द्र. इदं इन्द्रा. असि यम इति भार्गव जमदग्नि दीर्घतमस ऋ० त्रिष्टुब्छन्दः यमो देवता यमप्री. पला. ओं असि यमो. इदं यमाय. उदक स्पर्शः कार्षिरसीति दध्यङ्ङाथर्वण ऋषिः अनुष्टुब्छन्दः कालो देवता कालप्री. पला. ओंकार्षिरसि. इदं काला. ओं चित्रावसो मन्त्रस्य प्रजापतिर्ऋषिः जगती छन्दः चित्रगुप्तो देवता चित्रगुप्तप्री. पला. ओं चित्रावसो. इदं चित्र. । अथ प्रत्यधि *देवतानां होमः अग्निंदूतमिति विरूपाक्ष ऋषिः अनुष्टुब्छन्दः अग्निर्देवता अग्निप्री. पला. ओं अग्निंदूतं. इदमग्न. अप्स्वन्त इति बृहस्पतिर्ऋषिः अनुष्टुब्छन्दः आपो देवता अपांप्री. पलाश. ओं इदं विष्णुः मन्त्रस्य मेधातिथि ऋषिः गायत्री छन्दः विष्णुर्देवता विष्णुप्री. पलाश. ओं इदं विष्णु.

कुशेषु त्रिपत्रेणैकाहुतिरिति संस्कार भास्करे।

*चतस्रश्चाहुतयः प्रत्येकं देयाः शांतिकमलाकरे।

विष्ण. त्रातारमिति मन्त्रस्य गार्ग्य ऋषिः त्रिष्टुब्छन्दः इन्द्रो देवता इन्द्रप्री. पलाश. ओंत्रातार. इदमिन्द्रा. आदित्यैरास्नेतिदध्यङ्ङाथर्वण ऋषिः यजुः छन्दः इन्द्राणी देवता इन्द्राणीप्री. पला. ओंअदित्यैरास्ना. इदमिन्द्राण्यै. प्रजापत इति हिरण्यगर्भ ऋषिः त्रिष्टुब्छन्दः प्रजापति र्देवता प्रजापतिप्री. पला ओंप्रजापतेन. नमोस्तु इतिदेवा ऋषिः अनुष्टुब्छन्दः सर्पा देवता सर्पाणांप्री. पलाश. ओंनमोस्तु. इदं सर्पे. ब्रह्म यज्ञानमिति प्रजापति ऋषिः त्रिष्टुब्छन्दः ब्रह्मा देवता ब्रह्माप्री. पलाश. ओंब्रह्मयज्ञा. इदं ब्रह्मणे. । अथ विनायकादीनां होमः ओंगणानांत्वेति प्रजापति ऋषिः यजुः छन्दः गणपति र्देवता गणपतिप्री. पलाश. ओंगणानांत्वा. इदं गणप. अंबे अंबिक इति प्रजापति ऋषिः अनुष्टुब्छन्दः दुर्गा देवता दुर्गाप्री. पलाश. ओंअंबे अंबिके. इदमम्बायै वातोवेति गन्धर्वा ऋषिः उष्णिग्छन्दः वातो देवता वायुप्री. पलाश. ऊर्ध्वा. अस्येति मन्त्रस्य प्रजापति ऋषिः अनुष्टुब्छन्दः आकाशो देवता आकाशप्री. पलाश. ओंऊर्ध्वा अस्य. इदमाकाशा. यावांकशेति मेधा तिथि ऋषि गायत्री छन्दः अश्विनौ देवते अश्विनौप्री. पला. ओंयावाङ्कशे. इदमश्विभ्यां । *अथेन्द्रादि दिक्पाल होमः त्रातारमिति गार्ग्य ऋषिः त्रिष्टुब्छन्दः इन्द्रो देवता इन्द्रप्री. पलाश. ओं त्रातारमिन्द्र.

---

*आहुतिद्वयं प्रत्येकं शांतिकमलाकरे ।

इद मिन्द्राय· अग्निंदूतामिति विरूपाक्ष ऋषि अनुष्टुब्छन्दः अग्निर्देवता अग्निप्री· पला· ओंअग्निदूतं· इदमग्न· आसियम इति भार्गव जमदग्नि ऋषि त्रिष्टुब्छन्दः यमो देवता यमप्री· पला· ओंअसियमो· इदं· एषते· वरुण ऋषि यजुः छन्दः निर्ऋ देवता निर्ऋप्री· पला· ओंएष· इदं· इमंमेतिशुनःशेफ ऋषि गायत्री छन्दः वरुण देवता वरुणप्री· पला· इमंमे· इदं· वातो वामनेति· गन्धर्वा ऋषि उष्णिग्छन्दः वातो देवता वा प्री० पला· ओं वातोवा० इदं· वय· इति बन्धुः ऋषि· गायत्री छन्दः कुवेरो दे· कुवेर प्री· पला· ओं वय ॅ सोम· इदं· तमीशान मिति गौतम ऋषिः जगती छ· ईशोदे· ईश प्रीत· पला· ओं तमीशानं· इदं· ब्रह्मयज्ञान मिति ब्रह्मा ऋ· त्रिष्टुब्छ· ब्रह्मा· दे· ब्रह्माऋ· पला· ओं ब्रह्म यज्ञान· इदं ब्रह्म· नमोस्तु· इति देवा ऋ· अनुष्टुब्छ· सर्पो दे· सर्प प्री· पला· ओंनमोस्तु सर्पेभ्य· इदं· ओंक्षेत्रपालाय स्वाहा इदं· ओं वास्तोष्पतये स्वाहा इदं· ओं अगस्ताय स्वाहा इदम· ओं ध्रुवाय स्वाहा इदं· ओं सप्तर्षिभ्यः स्वाहा इदं· ओं वर्तमान संवत्सराय स्वाहा इदं· ओं वर्तमान संवत्सर देवतायै स्वाहा इदं· ओं वर्तमान अयनाय स्वाहा इदं· ओं वर्तमान देवतायै स्वाहा इदं· ओं वर्तमान ऋतवे स्वाहा इदं· ओं वर्तमान ऋतुदेवतायै स्वाहा इदं· ओं वर्तमन मासाय स्वाहा इदं· ओं वर्तमान मास देवतायै स्वाहा इदं· ओं वर्तमान पक्षाय स्वाहा इदं· ओं वर्तमानप· ओंवर्तमान पक्षदेवतायै स्वाहा इदं· ओं वर्तमान तिथये स्वाहा इदं· ओं

वर्तमान तिथिदेवतायै स्वाहा इदं. ओं वर्तमान वाराय स्वाहा इदं. ओं वर्तमान वारदेवतायैस्वाहा इदं ओं वर्तमान नक्षत्राय स्वाहा इदं ओं वर्तमान नक्षत्रदेवताय स्वाहा इदं ओं वर्तमान योगाय स्वाहा इदं० ओं वर्तमान योगदेवतायै स्वाहा इदं० ओं वर्तमान करणाय स्वाहा इदं० ओं वर्तमान करण देवतायै स्वाहा इदं० समस्तव्यस्त व्याहृतीनां विश्वामित्र जमदग्नि भरद्वाज प्रजापतय: ऋषय: अग्निर्वायु सूर्य प्रजापतयो देवता गायत्र्युष्णिगनुष्टुव्बृहत्य: छदांसि प्रायश्चिताज्य होमे वि० ओं भू: स्वाहा अग्नये इदं ओं भव: स्वाहा वायवे० इदं ओं स्व: स्वाहा सूर्य्याय इद० ओं भूर्भुव: स्व: स्वाहा प्रजापतय इदं० ओं त्वन्नो अग्ने इत्यस्य वामदेवऋ० अनुष्टुव्छं० अग्नि वर्णौ देवते आज्य हो० ओं त्वन्नो अग्ने वरुणस्य विद्वान् देवस्यहेडो० अवयासि सिष्ठा: यजिष्टो वह्नितम: शोशुचानो विश्वाद्वेषा ँ सिप्रमुग्धस्मत स्वाहा इदं० मग्नी वरुणाभ्या ओं सत्वन्नो अग्ने इत्यस्य महावामदेवऋ० अनुष्टुव्छं० अग्नि वरुणौ देवते आज्यहो ० ओं सत्वन्नो अग्ने वमो भवोती नेदिष्टो अस्या उषसो व्युष्टौ अवयक्ष्वनो वरुण ँ रराणाभ्यां नमम० ओं अयाश्चाग्ने त्यस्य प्रजापति ऋ० पंक्ति: छं० अग्निर्दे० आज्यहो० आ अया श्चाग्नेस्य नभिशस्ति पाश्च सत्व मित्व मया असि "अयनो यज्ञं वहास्य यानो धेहि भेषज ँ स्वाहा इद मग्नये ओं येते शतमित्यस्य शुन: शेफऋषि स्त्रिष्टुव्छं० बरुणा दयोदे० आज्यहो० ओं येते शतं वरुणये सहस्त्रं यज्ञिय: याशा वितता महान्त: तेभिर्नो अद्यसवितो तविष्णुर्विश्वे

मुंचन्तु मरुतः स्वर्काः स्वाहा इदंवरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्चनमम ओं उदुतम मित्यस्य शुनः शेफ ऋ. त्रिष्टुछ्छ. वरुणोदे. आज्य होमे. ओं उदुतमं वरुण पाशमस्मद वाधमं विमध्यम ँ श्रथाय अथाव्वय मादित्य व्रतेत वानागसो अदितये स्याम स्वाहा इदं वरुणाय ओं ब्रह्मणे स्वाहा इदं० यदस्य कर्म्मण इत्यस्य हिरण्यगर्भ ऋ० अग्निः स्विष्ट कृद्देवता अतिधृतिः छन्दः स्विष्ट कृद्धोमे. यत्कर्मणा त्यरी रिचन्य द्वान्यून मिहाकरं अग्नि ँ स्विष्ट कृद्विद्वान्स्विष्ट ँ सुहुतं करोतु स्वाहा अग्नये स्विष्ट कृते सुहुत हुते सर्व प्रायश्चिताहुती मांकामानां समर्द्धयत्रे सर्वान्नः कामान्समर्धयस्व अग्नये *स्विष्ट कृते इदं० स्वाहा त्रिसंधातेनरुद्रं ओं रुद्राय पशु पतये स्वाहा इदं अपः उपस्पृश्य अतोदेव इति द्वयोः काण्वो मेधा तिथि ऋ० आद्याया देवा देवता द्वितीयायाः विष्णु र्दे० गायत्री छ० प्रायश्चिताज्य हो० ओं अतोदेवा अवंतुनो यतो विष्णु र्विचक्रमे पृथिव्याः सप्तधामभिः स्वाहा देवेभ्य इदं० ओं इदं विष्णु र्विचक्रमे त्रेधानिदधेपदं समूढमस्यपा ँ सुरे स्वाहा विष्णवे

---

*प्राङ् महा व्याहृतीभ्यः स्विष्ट कृद न्यत्र दाज्याद्धविरिति गृह्यसूत्रे ।

महाहुतिभ्यः प्राक् पूर्वं स्विष्ट कृद्यागो भवति ।

चेद्यदि आज्य सकाशा दन्यद्पि चरु प्रभृतिर्भवति केवलाज्य होमे सर्वा हुति शेषे भवतित्यर्थः ।

इदं ततो ब्रह्मा कर्तारं परीत्याग्नेर्वायव्य देशे तिष्ठन्नेता एवाहुतीर्जुहुयात् त्यागं यजमानो त्रकुर्य्यात् अनाज्ञाते तिमंत्रद्वयस्य हिरण्य गर्भ ऋ० अग्निर्दे० त्रिष्टुप्छ० ज्ञाता ज्ञात दोष परिहारार्थे प्रायश्चिताज्य हो० ओं अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मिथु अग्ने तदस्य कल्पयत्व ँ हिवेत्थ यथा तथ ँ स्वाहा अग्नये इदं ओं पुरुष संमितो यज्ञो यज्ञः पुरुष संमितः अग्ने तदस्य० यत्पाके त्यस्य आत्थात्रित ऋ० अग्निर्दे० त्रिष्टुछं० ज्ञाता ज्ञात० ओं यत्पाकत्रा मनसा दीनदक्षान यज्ञस्य मन्वते मतासिः अग्निष्टद्धोता क्रतु विद्धि जानन्य जिष्टो देवा ँ ऋतुशो यजाति स्वाहा अग्नये इदं यद्वो देवा इत्यस्य आंभितपाऋ० मरुतो दे० त्रिष्टुब्छं० मंत्रतंत्र विपर्यासादि निमित्तक प्राय्यश्चिताज्य हो० ओं यद्वोदेवा अति पातया निवाचाच प्रयुती देवहेलनम् अरायो अस्माँ अभिदुच्छु नायते न्यत्रास्मिन्मरुत स्तान्निधेन स्वाहा मरुद्भ्य इदं० आचम्य पुनराचम्य अद्यकृत होम कर्म्माणि कृता कृता वेक्षण रूप ब्रह्म कर्म प्रतिष्टार्थं इदं पूर्ण पात्रं प्रजापति दैवत ममुक गोत्रायामुक शर्म्मणे ब्राह्मणाय ब्राह्मणो दक्षिणा त्वेन दातुमह मुत्सृजे इतिपूर्णपात्र संकल्पः ततो ब्रह्मग्रंथि विमोकः ततः पवित्रं गृहीत्वा सुमित्रियान इति यामित्रऋ० अनुष्टुप्छन्दः मित्रो दे० मार्जनेवि० ओंसुमित्रियानऽ आप ओषधयः सन्तु इति प्रणीता जलेन शिरः संमृज्य० दुर्मित्रिया इति मन्त्रस्य यामित्र ऋषिरनुष्टुब्छं० दुर्धर्ष भैरवो दे० प्रणीतापात्रस्थ जल प्रवाहने वि० ओंदुर्मित्रियास्तस्मै

सन्तु योस्मान्द्वेष्टियंच वयं द्विष्म० इत्यैशान्यां प्रणीतान्युब्जी कुर्य्यात् । ततो *वर्हिस्तरणक्रमेणोत्थाप्य घृताक्तां कृत्वा जुहुयात् ओंदेवा गातु विदोगातुं वित्वा गातु मित मनस्यत इमं देव यज्ञ ँ स्वाहा वातेधाः ततो विनायका नयनं तत्पूजनंच कृत्वा ओं विनायकाय नमः इति गन्धादिना प्रार्थयेत् वक्रतुण्ड महाकाय कोटि सूर्य्य समप्रभ अविघ्नंकुरुमेदेव सर्व कार्य्येषु सर्वदा ततो देशाचारेण तैलपातनं तत्र कन्यायै दक्षिणां दत्वा तद्धस्तेन तैलाभ्यंगः कार्य्यः तत्र मन्त्रः क्षेत्रपालाः सलोकेशा मातृकाः कुलदेवताः राशयो भानियोगाश्च कलाः काष्टा मुहूर्तकाः व्रह्मा विष्णुश्च रुद्रश्च साध्या विश्वे मरुद्गणाः तैलाभ्यंगेन कन्यायाः तुष्यन्तु सर्वतो ग्रहाः वालक विषये वालकस्येत्यूहः ततो लताचेति मन्त्रेण तृतीय जज्जली पूरणं ततः कन्या विवाहे गजदन्त भूषण दानं । ओं अद्येत्यादि अमुक गोत्रो मुक शर्म्मा श्रुत्याद्युक्त फलावाप्तये स्वभागनेयी मलंकर्तु काम इदं गजदन्त निर्मितं प्रकोष्ट भूषणं वलयावल्यभिध मुत्तानां गिरो दैवतकं यथानाम गोत्रायै भागनेय्यै अमुक देव्यै दातुमह मुत्सृजे कृतैतद्दान सांगता सिध्यर्थं दक्षिणां दास्ये ततः कन्याप्येकं वलयं तण्डुलादियुतं स्वसौभाग्य सिद्धये व्राह्मणाय दद्यात ओंअद्येत्यादि अमुक गोत्रामुक देव्यहं स्वसौभाग्य सिद्धये श्री गौरी प्रीतये एतद्गजदन्त

---

*वर्हि होंम आवसथ्या धान एव तत्रैव विधान सामर्थ्यात् नान्यत्र इहैव वचनात् इति कर्को जयरामश्च यदा होमोन कृतः परिस्तरणानु त्तरेत्यजे देकी कृत्य

निर्मितं वलयं तण्डुलान्नादि सहितमुत्तानां गिरो दैवतकं यथानाम गोत्राय ब्राह्मणाय दातुमह मुत्सृजे कृतैतदित्यादिना दक्षिणा *दानं ततो नारिकेल फलादिना पूर्णाहुतिः ओं मूर्द्धान मिति भारद्वाज ऋ० वैश्वानरो देवता त्रिष्टुब्छ० अपूर्ण पूर्णार्थे पूर्णाहुति होमे वि० ओं मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानर मृत आयातमग्निं कवि ँ सम्राज मतिथिं जनाना मासन्ना पात्रं जनयन्त देवाः स्वाहा इदमग्नये ततो घृतधारां दद्यात् ओं आयुष्मानग्नेह विषावृधानो घृत प्रतीको घृतयो निरेधि घृतं पीत्वा मधुचारु गव्यं पितेव पुत्रमभि रक्षता दिमान्त्स्वाहा । ओं मानस्तोक इति मंत्रस्य कुत्स ऋ० रुद्रो देवता जगती छं० विभूति ग्रहणे वि० ओंमानस्तोके तनये मान ऽआयुषि मानो गोषु मानो अश्वेषुरीरिषः मानो वीरान् रुद्र भामिनो वधीर्हं विष्मन्तः सदमित्वा हवामहे इति विभूती गृहीत्वा दक्षिणानामिकया ओं त्र्यायुषं जमदग्ने इति ललाटे ओं कश्यपस्य त्र्यायुषं इति ग्रीवायां ओंयद्देवेषु त्र्यायुषं इति दक्षिणांसे ओंतन्नो अस्तु त्र्यायुषमिति

---

*सिंदूर कज्जल युतं वलिं गृहीत्वा भोक्षेत्रपाल डाकिनी शाकिनी भूत प्रेत पिशाचादि सहित सदीपं माष भक्तवलिं भक्ष्य भोक्षेत्र पाल वलिं भक्ष्यति दिशंरक्ष ममयजमानस्या ऽभ्युदयंकुरु आयु कर्ता क्षेम कर्ता तुष्टि कता पुष्टि कर्ता निर्विघ्न कर्ता वरदोभव अनेन वलिदानेन क्षेत्रपालः प्रीयताम्

ततः पूर्वे इंद्राय सांगाय सपरिवाराय सायुधाय सशक्तिकाया मुंसदीप माष भक्त वलिं समर्पयामि भो इंद्र वलिं भक्ष्य दिशं रक्ष्य सपरिवारस्य यजमानस्य शांति कर्ता भव एवं सपर दिक्पाल नवग्रहा धिदेवता प्रत्याधिदेवता पंचलोकपाला दिभ्यो दत्वा ।

हृदि अन्यस्य ग्यायुष करणे तन्नो अस्तु इत्यत्र तत्ते अस्तु इति पठनीयं ततो वर्हिषि पात्रं संस्थाप्य तत्र कुम्भ जलं निक्षिप्य दक्षिण पाणिना स्पृशन् ओंपूर्णमसि पूर्णमेभूया सुपूर्णं मासि सुपूर्णं मे भूया सदासि सन्मे भूयाः सर्वमासि सर्वं मे भूयाः अक्षितिरसिमामेक्षेष्ठाः इति जपित्वा कुशाग्रैः प्रागादि पंचदिक्षु मन्त्रैः जलं यथालिंगं सिंचेत् तेचमन्त्राः ओंदेवाऋत्विजो मार्जयन्तामिति प्राच्यां दिशि मासाः पितरो मार्जयन्तां इति दक्षिणस्यां अप उपस्पृश्य ग्रहाः पशवो मार्जयन्तां इति प्रतीच्यां आप ओषधयो वनस्पतयो मार्जयन्तां इत्युदीच्यां यज्ञः सम्वत्सरः प्रजापति मार्जयन्तां इत्यूर्ध्वायां ततः स्व शिरसि मार्जयेत् तत्र मन्त्रः आपो अस्मा नित्यस्य देवश्रवा ऋ० आपो देवता त्रिष्टुब्छ० अभिषेके विनियोगः ओंआपो अस्मान्मातरः शुन्धयन्तु घृतेननोघृतप्वः पुनन्तु विश्वंहिरिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरापूतएमि इदमापः सिंधु द्वीप ऋ० आपो दे. अनुष्टुब्छं. अभि. ओंइदमापः प्रवहतावद्यञ्चमलञ्चयत् यच्चाभि दुद्रोहानृतं यच्च शेपे अभीरुणम् आपोमातस्मादेनसः पवमानश्चमुञ्चतु। ततः सुरास्त्वामभि० इति यथा वाणप्रहाराणां कवचं भवति वारणं तद्वद्देवोपघातानां शांतिर्भवति वारणं। भिद्यंते कवचा घोरा भिद्यंते गिरि गह्वराः भिद्यंते सर्व शस्त्राणि अभेद्या ब्राह्मणा शिषः ततः कर्ता वायव्य देशे तिष्ठन्नग्निमुपतिष्ठेत् ओं अग्ने त्वन्न इति चतसृणां गौपायना लौपायना वावंधुः सुवंधुः

6085

श्रुतबंधु र्विप्रबन्धुश्चैकैकर्चा ऋषयोऽग्निर्देवता द्विपदा विराट् छं० अग्न्युपस्थाने वि० ओं अग्ने त्वन्नो अंतम उत त्राता शिवोभवावरूथ्यः वसुरग्निर्वसुश्रवा अच्छानक्षिद्युमत्तमं रयिंदाः । तंत्वाशोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः । ओंचमस्त्वरथ्वमे यज्ञोपचतेनमश्च यत्त न्यूनं तस्मैतउपयत्ते तिरिक्तं तस्मैतेनमः । ओंस्वस्तिश्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रिय बलं आयुष्यं तेज आरोग्यं देहिमे हव्य वाहन । इति ओंअद्येत्यादि अमुक गोत्रोमुक शर्म्मा मुक गोत्रस्यामुक शर्म्मणाः पुत्रस्य कृतैताद्विवाहोत्सवांगत्वेन सकल शांति प्रकृति सुत नवग्रह यज्ञ सांगता सिध्यर्थं मिदं हिरण्य माग्नि दैवतं वा रजतं चन्द्र दैवतं यथानाम गोत्रायाचार्य्याय दक्षिणां तुभ्यमहं संप्रददे इति यक्षांतद० अद्येत्यादि अमुक गोत्रो० यथानाम गोत्राय ब्राह्मणाय दक्षि० इति हवनद० ततो भूरिद० ओंअद्येत्यादि० कृतैतन्नवग्रह यज्ञ सांगता सिध्यर्थं इमां भूयसीं दक्षिणां नाना नाम गोत्रेभ्योब्रा० दातुमहं० ओमद्य कृतैतन्नवग्रह यज्ञ सांगता सिध्यर्थं यथासंख्यं ब्राह्म भोजन महं कारयिष्ये दक्षिणांच दास्ये ततोग्निं सम्पूज्य प्रदक्षिणी कृत्य प्रार्थयेत् धर्मं देहि धनं देहि पुत्रान्पौत्रांश्च देहिमे आयुरारोग्यमैश्वर्यं देहिमे हव्यवाहन ततः सूर्य्यादींश्च नाम मन्त्रैः पुष्पाञ्जलिं दत्वा ओं विश्वानि देव सवितुर्दुरितानि परासुव यद्भद्रं

---

*प्रणवादि नमोंतेव चतुर्थ्यंतंच सत्तम । देवतायाः स्वकंनाम मूलमंत्रः प्रकीर्तितः ॥

तन्न आसुव भद्रं कर्णोभिः द्यौः शांतिः यतो यतः समीहसे, इत्याशिषः प्रार्थ्य विसर्जयेत् यांतुदेव गणाः सर्वे पूजामादाय मामकीं इष्टकामप्रसिध्यर्थं पुनरागमनायच । ओंगच्छगच्छ सुरश्रेष्ठस्वस्थाने परमेश्वर यत्र देवालयाः सन्ति तत्र गच्छ हुताशन ततो नमो विवस्वते ब्रह्मन् भास्वते विष्णु तेजसे जगत्पवित्रे शुचये सवित्रे सर्व साक्षिणे इति सूर्य्यायार्घं दद्यात् ततः आज्ये मुखावलोकनं चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्यऽर्वरुणस्याग्नेः । आप्राद्यावा पृथिवी अन्तरिक्ष ᳪ सूर्य्य आत्मा जगतस्तस्थुषश्च आज्यं तेजः समुद्दिष्ट माज्यं पाप हरं परं आज्यं सुराणा माहारः सर्वं माज्ये प्रतिष्ठित दिवि भुव्यन्तरिक्षेच यन्मया दुष्कृतं कृतं तदाज्य दर्शनादेव विनाश मुपगच्छतु । ओंतत्सदद्य० ममाऽयुरारोग्य सिद्धयर्थं मुखावलोकित मिद माज्यं कांस्यपात्रस्थं प्राजापत्यं अमुक शर्म्मणे दातुमहमुत्सृजामि नमम । आज्य प्रार्थना कामधेनो समुद्भूतं देवानामुत्तमं हविः आयुर्विवर्धनंदातु राज्यं पातु सदैवमे इति यस्यस्मृत्या चनामोक्तया तपोयज्ञ क्रियादिषु न्यूनं सम्पूर्णतांयाति सद्यो वन्दे तमच्युतम् प्रमादात्कुर्वतां कर्म्म प्रच्यवेताध्वरेषुयत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादितिश्रुतिः अनेन कर्म्मणा श्री परमेश्वरः प्रीयतामिति समर्पयेत् ॥

श्री १०८ सकल शास्त्र प्रवीण गांभीर्य्यैश्वर्य्यादि गुण सम्पन्नानां
श्री १०८ गंगाधर शर्म्मणां चरणैक निलयेनोधमपुर निवासि
श्री पंडित वीणा प्रपौत्रेण श्री चन्द्रमौल्यात्मजेन जन्म
ब्रह्मचारिणा नित्यानन्द शर्म्मणा संगृहीता
नवग्रह शान्तिः समाप्ति मगात् ॥

प्रणीता पात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराशाद्य ब्रह्मणो मुख मवलोक्याग्ने रुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिष श्चतुर्थ भाग मादाय आग्नेयादीशानांतं ब्रह्मणोऽग्नि पर्य्यन्तं नैऋत्याद्वायव्यांतं अग्नितः प्रणीता पर्य्यन्तं ततोऽग्ने रुत्तरतः पश्चिम दिशि पवित्र छेदनार्थ कुशत्रयं पवित्र करणार्थ साग्रमनंतर्गर्भ कुशपत्रद्वय प्रोक्षणी पात्र आज्य स्थाली स्रुव संमार्जनार्थं कुश त्रयं उपयमनार्थं वेणीरूप कुशत्रयं समिध स्तिस्रः पलाशयः स्रुवः आज्यं षट पंचाश दुत्तर यजमान मुष्टि शत द्वयावछिन्नं तण्डुल पूर्ण पात्रं पूर्ण पात्र पूजनं पवित्र छेदन कुशैः पवित्रे छित्वा प्रादेश मित पवित्र करणं ततः सपवित्र करेण प्रणीतोदकं त्रिः प्रोक्षणी पात्रे निधाय अनामिकांगुष्टाभ्यां द्वाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवणं प्रोक्षणी पात्रस्य सव्य हस्त करणं अनामिकांगुष्टाभ्यां पवित्रे गृहीत्वा त्रिरुदिंगनं प्रणीतोदकेन प्रोक्षणी प्रोक्षणं ततः प्रोक्षणी जलेन यथा सादित वस्तु सेचनं ततोऽग्नि प्रणीतयो मध्ये प्रोक्षणी पात्र निधानं आज्य स्थाल्या माज्य निर्वापः ततोऽधि श्रयणं ततो ज्वलत्तृणादिना हविर्वेष्टयित्वा प्रदक्षिणी क्रमेण पर्य्यग्नि करणं ततः स्रुव प्रतपनं कृत्वा संमार्जन कुशाग्र रंतरतो मूलें वाह्यत इति स्रुव संमार्जनं कृत्वा प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्रुवं दक्षिणतो निदध्यात् ततोऽग्नि प्रदक्षिण क्रमेणाज्यस्थावतारणं तत आज्ये प्रोक्षणी

वदुत्पवनं अवेक्ष्य सत्यपद्रव्ये तन्निरसनं पुनः प्रोक्षण्युत्पवनं तत उपयमन कुशान् वाम हस्ते कृत्वा उत्तिष्ठन् प्रजापातिं मनसा ध्यात्वा तूष्णी मग्नौ घृताक्ताः समिधस्तिस्त्रः पालाश्यः प्रक्षिपेत् तत उपविश्य सपवित्र प्रोक्ष्यण्युदकेन प्रदक्षिण क्रमेणाग्नि पर्युक्षणं कृत्वा प्रणीता पात्रे पवित्रे निधाय पातित दक्षिण जानुः कुशेन ब्रह्मणान्वारब्धः समिद्धतम एवाग्नौ स्रुवेणात्याहुति र्जुहुयात् तत्रा घारादारभ्य द्वादशाहुतिषु तत्तदाहुत्यनंतरं स्रुवात्रस्थित हुत शेष घृतस्य प्रोक्षणी पात्रे प्रक्षेपः ततो होमः ॥

इति नवग्रह शान्तिः समाप्ता ।

श्री स्वामि नित्यानन्द तपोनिधि द्वारा संगृहीत ।

ॐ श्रीगणेशाय नमः ।

अथ विवाह विधिः ।

कन्या हस्तेन षोडश हस्त परिमितं मुख्यं मण्डपं विधाय तद्दक्षिणस्थां दिशि पश्चिमां दिशमाश्रित्य मण्डप संलग्न मुत्तराभिमुखं कौतुकागारञ्च मण्डपा द्बहिरैशान्यां जामातृ चतुर्हस्त परिमितां सिकतादि परिष्कृतां वेदीञ्च कारयेत् विवाह दिने कृत नित्य क्रियेण जामातृ पित्रा मातृ पूजा पूर्वकमाभ्युदयिक श्राद्धं कर्तव्यं कन्या पिता स्नातः शुचिः शुक्लाम्बर धरः कृत नित्य क्रियो मातृपूजाभ्युदयिके कृत्वा अर्हण वेलायां *मण्डपे प्रत्यङ मुखः प्राङ्मुखं वरं पूजयेत् तत्रादौ ओमद्येत्यादि

---

*मण्डपश्चात्र पूर्वोक्त एव द्वादश राशि पूजन स्थापनञ्चात्राधिकं ज्ञेयं ध्रुव पूजनञ्च उत्तरे पूजयित्वा ॐ ध्रुवराजो महापुन्यः ऋषीणां प्रवरः शुभ उदीच्यां दिशि माश्रित्य सध्रुवः प्रीयतां मम ॥ १ ॥ अद्येत्यादि पुत्रि विवाह कर्म्मणि कन्यादान प्रतिपत्यर्थं मादाविमां पट्ट निर्मितां सोत्तरीयां मंजिष्ठारिष्ठा दिनारंजितां बृहस्पति दैवतां अमुक गोत्राय ॥

अमुक गोत्रे मुक शर्म्मा आत्मनः कन्याया निर्विघ्न समाप्ति पूर्वकं लघु वेदिका मध्ये गणपत्यादि समस्त मण्डलाधिष्ठित देवतानां पूजन महं करिष्ये ततो कन्या भ्राता वराय *धौत वस्त्रं दद्यात् तत्र मन्त्रः अस्मिन्काले ऽग्नि सानिध्ये स्नातः स्नातेह्य रागिणि अव्यंग ऽपतिते क्लीबे पिता तुभ्यं प्रदास्यति ततो वरो धौती परिधाय हस्त पादो प्रक्षाल्याचम्यात्म पूजां कृत्वा सूर्य्यं धूप दीपादिकं पूजयेत् अद्येत्यादि अमुक शर्म्मा अमुक गोत्र आत्मनो विवाहोत्सवे ऽन्तर्वेदिका मध्ये समस्त मण्डलाधिष्ठित देवता पूजन महं करिष्ये ततो दाताचार्य्यौ वरोपरि दिग्बन्धनं करोति ओं पूर्वे रक्षतु गोविंदः आग्नेयां गरुडध्वजः याम्यां रक्षतु वाराहो नारसिंहोथ नैऋते केशवश्च प्रतीच्यां वा वायव्यां मधुसूदनः उत्तरे श्रीधरो रक्षे द्वैषण्याश्च गदाधर ऊर्ध्वगो वर्धनो रक्षे दधस्ताच्च महेश्वरः एवं दश दिशो रक्षेद्वासुदेवो जनार्दनः यजमानं सपत्नीकं रक्षतां सर्वतो हरिः ततः स्वस्ति वाचनं ग्रहादि पूजनं कुर्यात् वरो दाताच ततः मेषादि द्वादश राशि पूजनं मेषाद्यो झषान्ताश्च येवैद्वादश राशयः क्षेत्राणि भास्करादीनां

---

* संकल्पे मासः सौरः ग्राह्यः तच्चोक्तं आब्दिके पितृ कृत्ये च मासश्चान्द्रमसः स्मृतः विवाहादौ स्मृतः सौरः यज्ञादौ सावनो मतः अयमेव चैत्रादि संज्ञकः कर्म्मादौ स्मर्तव्यः केचिन्मीन राशि मारभ्य सौराणां संज्ञामाहुः अर्क संक्राति मारभ्योत्तर संक्रात्यावधिः सौरोमासः

पंच विंशति दर्भाणां वेण्यग्रे ग्रंथि भूषितः विष्टरः सर्व यज्ञेषु लक्षणं परिकीर्तितं रत्नमालाया ।

भवन्तु वरदा मम ततो दाता अद्येत्यादि अमुक गोत्रो ऽमुक शर्म्माहं मात्मनो दुरित क्षयार्थं श्रुति स्मृती पुराणोक्त फल प्राप्ति कामनया वर पूजन महं करिष्ये साधु भवानास्ता मित प्रजापति ऋषि ब्रह्मा देवता यजुः वरार्चने विनियोगः यजमानो वरस्य दक्षिण जानुं स्पृष्ट्वा साधु भवाना स्तामर्चयिष्यामो भवन्तमिति ओमर्चयेति वरः वरोपवेशनार्थे शुद्धमासन मादाय *विष्टरो विष्टरो इत्यस्य कपिल ऋषि स्त्रिष्टुप् छन्दो विष्टरो देवता विष्टर दाने विनियोगः विष्टरो विष्टरो विष्टर रित्यन्ये नोक्ते ॐ विष्टरः प्रतिगृह्यता मिति दाता वदेत् विष्टरं प्रगृह्णामि वर इत्यभिधाय विष्टरं गृहीत्वा ॐ वर्ष्मोंस्मीति अथर्वण ऋषि र्विष्टरो देवता ऽनुष्टुप्छन्दो विष्टरोपवेशने विनियोगः ॐ वर्ष्मोंस्मि समाना मुद्यता मिव सूर्य्यं इमंतमभितिष्ठामि योमाकश्चा भिदासति इत्यने आसने उत्तराग्र विष्टरो परिवर उपविशेत् ततो यजमानः पाद्य मंजलि नादाय पाद्यं पाद्यं पाद्यमित्यन्येनोक्ते ॐ पाद्यं प्रतिगृह्यता मिति दाता वदेत् ॐ पाद्यं प्रति गृह्णामीत्युक्त्वा यजमानांजलितोंजलिना पाद्यमादाय वरः । विराजो दोहोसीति मन्त्रस्य प्रजापति ऋषि रापो देवता अनुष्टुप्छन्दः पाद प्रक्षालने विनियोगः

---

* विष्टर लक्षणं—विष्टर स्त्रिवृदरत्निमात्रं कौशरज्ज्व विशेषिति भर्तृ यज्ञः; प्रादेश मात्रं त्रिवृतं कौशं अथवा काशनिर्मितं इति रेणुः, पंच विंशति दर्भतरुण मयं कूर्चमिति हरिहरः, पाणिभ्यां विष्टरं गृह्णीयादिति हरिहरः एकेनेति गदाधरः आर्द्राभ्यां पाणिभ्यां इति हर हरः शुष्के णेति गदाधरः ॥

ॐ विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः । इति दक्षिण पादं प्रक्षालयेत् क्षत्रियश्चेदादा वामचरण प्रक्षालनम् । अनेनैव विधिना द्वितीयं पादं प्रक्षाल्य ततः पूर्ववत् विष्टरांतरं गृहीत्वा पादयोरध उत्तराग्रं वरः कुर्यात् ततो दूर्वाक्षत फल पुष्प चन्दन युतार्घ पात्रं गृहीत्वा यजमानः ॐ अर्घोऽर्घो ऽर्घ इत्यन्ये नोक्ते ॐ अर्घः प्रति गृह्यता मिति दाता वदेत् । ततो वरः ॐ अर्घं प्रति गृह्णामि इत्युक्त्वा यजमान हस्ता दर्घं गृहीत्वा । आपः स्थेति मन्त्रस्य प्रजापति ऋषि रनुष्टुप्छन्दः आपो देवता ऽर्घ ग्रहणे विनियोगः । ॐ आपः स्थयुष्माभिः सर्वान्कामानवाप्नवानि इति शिरस्य क्षतादिकं किञ्चिद्दत्वा । ॐ समुद्रंव इत्यादि मन्त्रस्याथर्वण ऋषिः बृहती छन्दो वरुणो देवता ऽर्घ जल प्रवाहणे विनियोगः ओं समुद्र वः प्रहिणोमिस्त्वां योनिमभिगच्छत । अरिष्टास्माकं वीरामा परासे चिमत्पयः । ओं *इत्यर्घ पात्रस्थं

---

*अर्घ्यं जलं गन्ध पुष्पाक्षत बदरी मिश्रं शंख पात्रस्थ मिति भर्तृ यज्ञः गन्ध पुष्पाक्षत तिल शुभ्र सर्षप दूर्वा दध्यन्वितं सुवर्ण पात्रस्थ मिति हरिहरः अर्घ्यं शिरसाभिवन्द्य भूमौ प्रवाहयामि मन्त्रयेदिति हरिहर गदाधरौ ॥

जलमेशान्यां त्यजन्पठति तत *आचमनीयमादाय ओं आचमनीय माचमनीयमाचमनीय मित्यन्येनोक्ते ओं आचमनीयं प्रतिगृह्यतामिति दातावदेत् ततो वरः ओं आचमनीयं प्रतिगृह्णामीत्युक्त्वा यजमान हस्तात् आचमनीय मादाय ओं आमागन्निति मन्त्रस्य परमेष्ठी ऋषि र्बृहती छन्दः आपो देवता अपामुपस्पर्शने विनियोगः । ओं आमागन्य शसास ँ सृज वर्चसा तं माकुरु प्रियं प्रजानामधिपतिं पशूना मरिष्टं तनूनाम् । इत्यनेन सकृदाचामयेत् द्विस्तूष्णीं ततो दाता कांस्य पात्रस्थ दधि मधु घृतानि कांस्य पात्र पिहितान्यादाय ओं †मधुपर्को मधुपर्को मधुपर्कं इत्यन्येनोक्ते ओं मधुपर्कः प्रतिगृह्यता

---

*आचमनं सर्वत्र कर्म्मणि स्मार्तमेव तच्चेत्थं ओं केशवाय नमः ओं नारायणाय नमः ओं माधवाय नमः इत्याचम्य ओं गोविन्दाय नमः इति दक्षिण करं प्रक्ष्याल्य ओं विष्णवे नमः ओं मधुसूदनाय नमः इति ओष्ठौ प्रक्षाल्य ओं त्रिविक्रमाय नमः इति आद्र प्रोक्षणं ओं वामनाय नमः इत्युदक मभि मन्त्र्य ओं श्रीधराय नमः इति वाम करं प्रक्षाल्य ओं हृषीकेशाय नमः इति दक्षिण पादं प्रक्षाल्य ओं पद्मनाभाय नमः इति वाम पादं प्रक्षाल्य ओं दामोदराय नमः इति शिरसि प्रोक्षणं ओं संकर्षणाय नमः इत्यधराष्ठ प्रोक्षणं ओं वासुदेवाय नमः इति दक्षिण नासा पुटस्पर्शनं ओं प्रद्युम्नाय नमः इति वाम नासा पुट स्पर्शनं ओं अनिरुद्धाय नमः इति दक्षिण नेत्र स्पर्शनं ओं पुरुषोत्तमाय नमः इति वाम नेत्र स्पर्शनं ओं अधोक्षजाय नमः इति दक्षिण कर्ण स्पर्शनं ओं नारसिंहाय नमः इति वाम कर्ण स्पर्शनं ओं अच्युताय नमः इति नाभि स्पर्शनं ओं जनार्दनाय नमः इति हृदय स्पर्शनं ओं उपेन्द्राय नमः इति मस्तक स्पर्शनं ओं हरये नमः इति दक्षिण वाहु स्पर्शनं ओं श्रीकृष्णाय नमः इति वाम बाहु स्पर्शनं ॥

†पलमेकं घृतं चैव द्विपलं दधि प्रोच्यते पलमेकं मधु कुर्य्यान्मधुपर्के विधिः स्मृतः, दध्यलाभे पयोजलं वा मध्वलाभे गुडः सर्पिर्वा प्रतिनिधिः ॥

मिति दाता वदेत् ततो वरः ओं मधुपर्कं प्रति गृह्णामि इत्युक्त्वा मित्रस्येति मन्त्रस्य प्रजापति ऋषिः पंक्ति श्छन्दः मित्रो देवता मधुपर्कं दर्शने विनियोगः । ओं मित्रस्य त्वा चक्षुषा प्रतीक्षे इति दातृ करस्थमेव निरीक्ष्य देवस्यत्वेति ब्रह्मा ऋषि गायत्री छन्दः सविता देवता मधुपर्क ग्रहणे विनियोगः ओं देवस्यत्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि इत्युक्त्वा मधुपर्कं पाणिभ्यां गृहीत्वा वामहस्ते कृत्वा नमः श्यावेति प्रजापति ऋषि गायत्री छन्दः सविता देवता मधुपर्का लोडने विनियोगः ॐ नमः श्यावास्या यान्नशने यत्त आविद्धं तत्ते निष्कृंतामि इत्यनामिकया त्रिः प्रदक्षिण मालोड्यांगुलि गतं मधुपर्क लेपं वसवस्त्वा गायत्रेण छन्दसा भक्षयन्तु इति पुरस्ता न्निक्षिपेत् एवं रुद्रास्त्वा त्रैष्टुभेन छन्दसा भक्षयंत्विति दक्षिणतः आदित्यस्त्वा जागतेन छन्दसा भक्षयन्तु इति पश्चात् विश्वेदेवास्त्वा अनुष्टुभेन छन्दसा भक्षयन्तु इत्युत्तरतोक्षिप्त्वा भूतेभ्यस्त्वेति त्रिरावृत्तेन मन्त्रेण मध्यात् किञ्चिद् गृहीत्वा त्रिरूर्ध्वं क्षिप्त्वा अनामिकांगुष्ठाभ्यां भूमौ क्षिपेत् पुनस्तथैवाद्भिः प्रत्येकं क्षिपेत् यन्मधुनेति मन्त्रस्य प्रजापति ऋषि मधुपर्को देवता अनुष्टुप्छन्दो मधुपर्क प्राशने विनियोगः ॐ यन्मधुनो मधव्यं परमꣳ रूपं मन्नाद्यं तेनाहं मधुनो मधव्येन परमेण रूपेणाऽन्नाद्येन परमो मधव्यो न्नादोसानि इति वार त्रयं मधुपर्कं प्राशनं प्रति प्राशने चैतन्मन्त्र पाठः ततो मधुपर्कं शेषम सञ्चर देशे धारयेत् गण्डूषं कुर्यात् आचम्य

ओं वाङ्म आस्येऽस्तु ओं नसोर्मे प्राणोऽस्तु ओं अक्ष्णोर्मे चक्षुरस्तु ओं कर्णयोर्मे श्रोत्रमस्तु ओं बाह्वोर्मे बलमस्तु ओं ऊर्वोर्मे ओजोऽस्तु ओं अरिष्टानिमे*ऽङ्गानि तनूस्तन्वामे सह सन्तु इत्यास्यादि प्रत्येकं सर्वं गात्राणि स्पृशेत् अथ गवालंभः वरस्य समीप भूमौ उदगग्र दर्भानास्तीर्य्य दाता वर हस्ते निष्क्रय द्रव्यं दत्वा गौर्गौर्गौरिति पठेत् वरो द्रव्यं गृहीत्वा मन्त्रं पठेत् ओं माता रुद्राणां दुहिता वसूना ँ स्वसादित्याना ममृतस्य नाभिः प्रनुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट मम चामुक शर्म्मणो यजमानस्य पाप्मा हतः ओं उत्सृजत तृणान्यत्त्विति ब्रूयात् इत्यनेन वरः कुशोपरि द्रव्यमुत्सृजेत् ततः ओं अद्येत्यादि नाना रागानुकूल यज्ञाधिष्ठातृ परमेश्वरादि विशेषणवतो भगवतः प्रीत्यर्थं तत्प्रसादात् याज्ञिक भूमि दान जन्य नाना स्वर्गादि फल प्राप्तये इमानि रजत मुद्रिकानि चन्द्र दैवतानि वरार्चन नैमित्तकानि यथा नाम गोत्राय०

---

*यद्यपि सूत्रकारेण गवालंभो नियमेन उक्त स्तथापि मधुपर्के पशो र्वर्ज्जन इति स्मृत्यन्तरात् त्याज्य एव अतः कलियुगे उत्सर्ग एव अथवा तन्निष्क्रय द्रव्योत्सर्गः यज्ञ विवाहयोरमांसो र्घोन भवति यज्ञ मधि कृत्य विवाहं चाधि कृत्य कुरुते त्येवं प्रयोगः गोरालंभश्च कलि वर्जिते काले भवति उत्सर्गस्य च विवाह यज्ञयोरप्राप्तत्वात् गौरित्याद्युच्चारणं विवाह यज्ञयोः कलौ न प्रवृत्ति रिति गदाधरः गोर्निषेधात् तत्स्थाने अजालंभः पायसं भवेति जयराम किंचित् द्रव्य देय मिति संस्कार कौस्तुभे सर्वांगालंभ उभाभ्यां कार्य्य इति हरिहरः एकेन पाणिनेति गदाधरः प्राणायतन स्पर्शः सजल पाणिना कार्य्य इति हरिहरः जल रहितेन पाणिनेति गदाधरः स्पर्शांत कर्मैव मधुपर्क कर्म्म कलौ भवतीति सम्प्रदाय भाष्ये ॥

इति कन्या प्रद कर्तृक संकल्पः ततो वेदिकायां तुष केश शर्करादि राहितायां हस्तमात्र परिमित चतुरस्रां भूमिं कुशैः परि समूह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्रुवेण स्फ्येन वा प्रागग्र प्रादेश मात्र मुतरोत्तर क्रमेण त्रिरुल्लिख्य उल्लेखन क्रमेणानामिकांगुष्ठाभ्यां उद्धृत्य जलेनाभ्युक्ष्य तत्र तूष्णीं कांस्य पात्रस्थ वह्निं प्रत्यङ् मुखं समाधाय तद्रक्षणार्थं कंचिन्नियुज्य कौतुकागाराद्वरः कन्या मानीय मण्डपे कन्या नाम मन्त्रैः द्वैमातुरोंकार लक्ष्मी कुबेरानर्चयित्वा तथा शचि पूजनंच कृत्वा गौरीहर पूजनं कुर्य्यात् ततः कन्या माता सुधा लिप्त कुड्ये आम्र वृक्षं कुंकुमेन चन्दनेन वा विलिख्य तदग्रे भूमौ रंगवल्लीं विरच्य तत्र कोण चतुष्टये स्थापित कलश श्रेणीनां मध्ये सूत्र वेष्टित दृषदं निधाय तदुपरि अग्रभागे उखलं निधाय तत्र वस्त्रे वा तण्डुल पुंजे अन्योन्यालिंगित गौरी हर पूजनं कुर्य्यात् तत्र मन्त्रः सिंहासनस्थां देवेशीं सर्वालंकार संयुतां पीताम्बर धरं देवं चन्द्रार्ध कृत शेखरं करेणाथ सुधा पूर्णं कलशं दक्षिणे नतु वरदं चाभयं वामेनाश्लिष्य च तनु प्रियामिति ध्यात्वा गौरीहर महेशान सर्व मङ्गल दायक पूजां गृहाण देवेश सर्वदा मङ्गलं कुरु इति पूजा मन्त्रः ततो यजमानः वराय वस्त्र चतुष्टयं प्रयच्छति तेषु वरो वस्त्र द्वयं कन्यायै ददाति वस्त्र *द्वयं

---

*हरिहर गदाधरयोर्मते वर कर्तृकं परिधानं भर्तृ यज्ञ मते आचार्य्य कर्तृकं वरस्यै वेति मन्त्र पाठः हरिहर गदाधरौ उभयोर्मन्त्र पाठेति भर्तृ यज्ञः ॥

परिधत्ते जरां गच्छेति मन्त्रस्य प्रजापति ऋंषि स्त्रिष्टुप्छन्दो वासो देवता वस्त्र परिधाने विनियोगः ओं जरां गच्छ परिधत्स्व वासो भवाकृष्टी नामभिशास्ति पावाशतंच जीव शरदः सुवर्चा रयिं च पुत्राननुसंव्यय स्वायुष्मतीदं परिधत्स्व वासः इति पठित्वा परिधान वस्त्रं तस्यै ददाति वरः या अकृंतन्निति मन्त्रस्य प्रस्कण्व ऋषि र्वासो देवता वस्त्र परिधाने विनियोगः ओं याअकृंतन्न ऽवयं या अतन्वत याश्च देवीस्तं तूनभितो ततंथता स्त्वादेवीर्जिरसे संव्ययस्वा युष्मतीदं परिधत्स्व वासः इति पठित्वोत्तरीयं ददाति वरः परिधास्यै इति मन्त्रस्याथर्वण ऋषि स्त्रिष्टुप्छन्दः तन्तवो देवता वासः परिधाने विनियोगः ओं परिधास्यै यशोधास्यै दीर्घा युत्वाय जरदष्टि रस्मि शतंच जीवासि शरदः पुरूवी रायस्पोषमभि संव्ययिष्ये इति पठित्वा वरः परिधत्ते इति अधो वस्त्रं यशसेति मन्त्रस्य प्रजापति ऋंषि जंगती छन्दो विधाता देवता वासो धारणे विनियोगः ओं यशसा माद्यावा पृथिवी यशसेन्द्रा बृहस्पती यशोभगश्च माविद्यशोमा प्रतिपद्यतां इति पठित्वोत्तरीयं दधाति ततो वरस्य कन्यायाश्च द्विराचमनं ततः कन्या प्रदेन परस्परं *समंजेथां इति प्रैषितयो कन्या वरयोः परस्पर माभिमुखी करणं तत्र वर पठनीयो मन्त्रः समंजन्त्विति मन्त्रस्याथर्वण ऋषि रनुष्टुप्छन्दो विश्वेदेवा देवता

---

*समंजनं संमुखी करणं मिति हरिहर गदाधरौ परस्परं गात्र विश्लेषेति भर्तृयज्ञः परस्परानुलेपनं इति केचित् ॥

मैत्री करणे विनियोगः ओं समंजंतु विश्वेदेवाः समापो हृदयानिनौ संमातरिश्वा संधाता समुदेष्ट्री दधातुनौ इति वरः पठेत् ततः कन्या प्रद कर्तृक ग्रन्थि बन्धनं कङ्कण बन्धनं कन्या वरयोः *कन्या दानं दाता स्वदक्षिण पत्न्या सह †दक्षिण वर पार्श्व भागे शुभासने ‡उदङ् मुख उपविश्याचम्य अद्येत्यादि अस्याः कन्यायाः अनेन वरेण धर्म प्रजया उभयो वंशयोः वंश्य वृद्ध्यर्थं तथा मम समस्त पितॄणां निरतिशय सानन्द ब्रह्म लोका वाप्त्यादि कन्या दान कल्पोक्त फल वासये अनेनास्यां कन्याया मुत्पादयिष्यमाण संतत्या दश पूर्वान्दश परान् मांचैक विंशति पुरुषानुद्धर्तुं §ब्राह्म विवाह विधिना श्री लक्ष्मी नारायण प्रीतये कन्या दान महं करिष्ये दाता शंखस्थ

---

*कन्यादानात्प्राक् पण्डिताः वर्ण वश्य षडष्टकादि विरुद्धे कन्याया नाम परिवर्तनं कुर्वंति तन्न युक्तं कुतः नाम करण दिने मातृ पितृभ्यां तस्य नियुक्तत्वात् षडष्टक तारादि विरोधे दानं देयं तच्चोक्तं वराहेण हेमाज्य रत्न गोदानं मृत्युञ्जय जपादिक कुर्य्यादावश्यको ह्याहे नाडी दोषापनुत्तये ताम्रं द्विद्वादशे दद्यात्सुवर्णं च षडाष्टके गोयुग्मं नव पंचाख्ये स्वर्ण वर्णादि दूषणे आमान्न वसनं धेनुं सर्व दोषापनुत्तये ॥

†सीमन्ते च विवाहे च तथा चातुर्थ्य कर्मणि मख दाने व्रत श्राद्धे पत्नी दक्षिणतो भवेत् ॥

‡सर्वत्र प्राङ्मुखो दाता प्रतिग्राही ह्युदङ् मुखः एष पत्र विधिर्यत्र कन्या दाने विपर्ययः इति ऋष्य शृगः ॥

§योग्यं वरमाहू यालंकृत्य कन्या दान विधिना तस्मै कन्या दानं ब्राह्मो विवाहः ॥

दूर्वाक्षत फल पुष्प चन्दन जलान्यादाय कन्या दक्षिण हस्तं गृहीत्वा ओं दाताहं वरुणो राजा द्रव्य मादित्य दैवतं विष्णोसौ विष्णु रूपेण प्रति गृह्णा त्वयं विधिः त्रिप्रातिरिक्त प्रहीतृ पक्षे विष्णो सावित्यत्र वरोसा विति पठेत् ततः ओं अद्यतत्सत् ब्रह्मणो द्वितीय परार्द्धे श्रीश्वेत वाराह कल्पे वैवस्वत मन्वन्तरे ऽष्टाविंशे कलौ युगे प्रथम चरणे जम्बू द्वीपे भारत खण्डे आर्य्यावर्त्ते पुण्य क्षेत्रे ऽमुकर्तौ मासोत्तमे मासे ऽमुक पक्षे ऽमुक तिथावमुक वासरे अमुक सगोत्रस्यामुक प्रवरस्या मुक शर्म्मणः प्रपौत्राय अमुक सगोत्रस्या मुक प्रवरस्या मुक शर्म्मणः पौत्राय अमुक सगोत्रस्या मुक प्रवरस्या मुक शर्म्मणः पुत्राय अमुक सगोत्रस्यामुक प्रवरस्या मुक शर्म्मणः प्रपौत्रीं अमुक सगोत्रस्या मुक प्रवरस्या मुक शर्मणः पौत्रीं अमुक सगोत्रस्या मुक प्रवरस्या मुक शर्म्मणः पुत्रीं अमुक नाम्नीं श्रीरूपिणीं इमां कन्यां इत्येकः पर्य्यायः एवमेव पुनः पर्य्याय *द्वयमुक्त्वा मम समस्त पितृणां च समस्त पाप क्षय पूर्वक कल्प कोटि शतावधि निरातिशय सानन्द ब्रह्म लोक महीय मानत्वादि यावज्जीव पुत्र पौत्रादि सकल कुटुम्ब सहितात्मीय कलेवरानामय दीर्घायुष्य युक्त धन धान्य समृद्धि विशिष्ट बहुतर सुख भोग वाप्त्यनन्तर सहस्राश्वमेध

---

*वर गोत्रं समुच्चार्य्य प्रपितामह पूर्वकं नाम संकीर्तयेत् विद्वान् कन्यायाश्चैव मेवहीति ऋष्य शृङ्गः ॥ सकृदिति गङ्गाधरः ।

रायसूय गृहमेध ज्योतिष्टोमाग्निष्टोमादि याग कोटिशोदश गुणोत्तर धेन्वनुडुहोद्यान रथ वाजि सर्व सस्य सम्पूर्ण सर्व रत्नोपशोभित सर्व पृथ्वी दान जन्य सम पुण्य प्राप्त्युत्तरे तत्कन्या शरीरावस्थित रोम सम संख्या युग सहस्रावच्छिन्न परमानन्द भोगास्पद वाप्ति सहित त्रिदिव वासोत्तर कल्प कोटि शतावलीढ श्री विष्णु लोक वास कामनया श्रीलक्ष्मी नारायण प्रीतये ऽमुक गोत्रो मुक शर्म्मा ऽमुक गोत्रा ममुक प्रवरा ममुक नाम्नी मिमां कन्यां सुस्नातां यथा शक्त्य लंकृतां गन्धाद्यर्च्चितां वस्त्र युगाच्छन्नां प्रजापति दैवतां अमुक गोत्राया मुक शर्म्मणे ऽमुक प्रवराया मुक शाखाध्यायिने विष्णु रूपिणे वराय पत्नीत्वेन *तुभ्यमहं संप्रददे ओं स्वस्ति इति प्रति वचनं ओं द्यौस्त्वाददातु पृथिवीत्वा प्रति गृह्णातु इति वरः पठन् प्रति गृह्णीयात् ततः कन्या प्रदः ओं अद्य कृतैतत्कन्या दान प्रतिष्ठार्थ मिदं सुवर्ण मग्नि दैवतं रजतं चन्द्र दैवतं वा मुक गोत्राया मुक शर्मणे वराय दक्षिणा महं संप्रददे इति दक्षिणां दद्यात् ततो ऽयेत्यादि० श्रुति स्मृति पुराणोक्त फला वाप्ति कामो ऽवगतानवगत सकल दुरितो पदुरितक्षय कामश्च नाना पट तन्तु संख्या समानेक कल्पावच्छिन्न वैकुण्ठ लोक प्राप्ति कामः श्रीलक्ष्मी नारायण प्रीति जनक बहु अश्वमेध यज्ञ फल

---

*इत्युक्त्वा सकुश जलं कन्या दक्षिण हस्तं वर दक्षिण हस्ते दद्यात् ॥

सूचक स्वपुत्री विवाहांग भूतां इमां सतूलोप धानादि संस्कृतां खट्वां उत्ताना मंगिरो दैवतां बृहस्पति देवताक सितरक्त पीताद्यनेक विध सुवर्ण रजत तन्तु मिश्रित वस्त्र संयुतां विश्व कर्म देवताकैः यथा परिमितैः रीति कांस्य लोहमय पात्रैः सपात्रितां चन्द्राग्नि सामुद्र देवताकाऽनेक विध विरचित रजत सुवर्ण भूषण भूषितां प्रजापति दैवताक त्रिविध पक्वान्नाद्यधिकरणकां सूर्य्य चन्द्र दैवतै र्यथा परिमित ताम्र रजत मयैः द्रव्ये स्सदक्षिणा ममुक गोत्राया मुक प्रवरायामुक शर्म्मणे वरायाहं संप्रददे इति वर हस्ते दद्यात् स्वस्तीति प्रतिवचनं ततः कन्यायाः पिता पठेत् धर्मार्थ काम भिर्नार्थै र्यो नरैः साध्यते परः धर्म्मस्त्वयानया सार्ध माचरितव्यः सर्वैचिरं धर्मेचार्थे चकामेच त्वयेयमति चारतो न त्याज्याऽज्याहुतिरिव भूतो संसार भूतिदां यस्त्वया धर्म श्चरितव्यः सोनया सह धर्मे चार्थेच कामेच त्वयेयं नातिचरितव्या वरः अहं नातिचरामीह यदुक्तं भवता ततः धर्मार्थ कामकैः कार्यैर्देह च्छायेव सर्वदा ततः काम स्तुतिं पठेत् ओं कोदात्कस्मा अदा त्कामोदात्कामायादात् कामोदाता कामः प्रतिग्रहीता कामै तत्ते वरः *कन्या प्रतिग्रह दोष परिहारार्थं गोदानं स्वर्ण दानंच कुर्यात् ओं तत्सदद्येत्यादि० श्रौत स्मार्तेतिहास पुराणोक्त फला वाप्ति कामः

---

*सम्प्रदाने भवेत्कन्या घृत होमे सुमंगली वाम भागे भवेद्भार्य्या पत्नी चातुर्थ कर्म्मणि ॥

श्रीपरमेश्वर नारायणादि विशेषण विशिष्ट भगवत्प्रीत्यर्थं तत्प्रसादात् पत्नी पाणे ग्रहण जन्य प्रतिग्रह विशेषताक पुरस्सर भार्य्यां त्रिवर्ग करण मित्यनेन प्रतिपादित धर्मार्थ काम प्रतिपत्तये गोदान प्रतिनिधि भूतं स्वर्ण माग्नि दैवतं रजतं चन्द्र दैवतं वा यथा नाम गोत्राय ब्राह्मणाय तुभ्य महं संप्रददे ओं अद्येत्यादि सकल दुरितोप दुरित क्षय पुरस्सर सकलत्र स्वशरीर कल्याणोत्तर पूर्णायु रादि सुख सम्पत्ति सिद्धि कामः कृतैतज्जन्मादि दश संस्कारान्तर्गत स्वविवाहात्मक महासंस्कार मन्त्रोच्चारण कारयितव्य कर्तव्यताक कर्म प्रतिष्ठार्थं च सांगता सिद्ध्यर्थं इमाममुक द्रव्य मयीं उपाध्याय दक्षिणां अमुक दैवतां यथानाम गोत्राय दक्षिणां दातु मह मुत्सृजे ओं अद्येत्यादि० पत्नी प्रतिग्रहोत्थ शान्त्यर्थं इमां सम्प्रदान दक्षिणां श्वशुर पुरोहिताय सम्प्रददे ततः कौसुम्भादि द्रव्यं (वरासूई पद वाच्यं) दर्शयित्वा तदा यदेषीति मन्त्रस्य दध्यङ्गाथर्वण ऋषि रनुष्टुप्छन्दः पवमानो देवता निष्क्रमणे विनियोगः ओं यदेषि मनसा दूरं दिशोनु पवमानो वा हिरण्यपर्णो वैकर्णः सत्वा मन्मनसां करोतु श्री अमुकी देवीति पठ न्निष्क्रामति इत्यन्तर्वेदि क्रम समाप्तः ।

अथ *वहिर्वेदिका क्रमः । वरो ऽद्येत्यादि० आत्मीय विवाहोत्सवे दीर्घं वेदिकायां गणपत्यादि समस्त मण्डलाधिष्ठातृ देवतापूजन महं करिष्ये ततो वेदि दक्षिणस्यां दिशि वारि पूर्ण दृढ कलश मूर्ध्वं तिष्ठतो मौनिनः पुरुषस्य स्कन्धे ऽभिषेक पर्यन्तं धारयेत् ततः परस्परं समीक्षेथां इति कन्या प्रद प्रैषानन्तरं अघोर चक्षुरित्यादि चतुर्णां मन्त्राणां प्रजापति ऋषि र्द्वितीय मन्त्रस्यानुष्टुब्छन्द स्त्रयाणां च त्रिष्टुब्छन्दः सोम गन्धर्वाग्नयो देवताः कुमारी समीक्षणे विनियोगः ॐ अघोर चक्षु रपतिघ्न्येधि शिवा पशुभ्यः सुमना सुवर्चाः वीरसू र्देवकामास्योना शन्नो भव द्विपदे शं चतुष्पदे सोमः प्रथमो विविदे गन्धर्व विविद् उत्तरः तृतीयोग्निष्टे पतिस्तुरीयस्ते मनुष्यजः सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये रयिंच पुत्रांश्चादादग्नि र्मह्य मथो इमांसानः पूषा शिवतमा मैरयसान ऊरू उशती विहर यस्यामुशन्तः प्रहरामशेफं यस्या मुकामा वहवो निविष्ट्य इति वरः पठित्वा मन्त्रान्ते परस्पर निरीक्षणं ततोग्निं प्रदक्षिणी कृत्य

---

*वेदिका प्रकारः नारदो हस्तोछ्रितां चतुर्हस्तां चतुरस्रां समन्ततः वरस्येति शेषः, वेदी प्राक् प्रवणा चतुर्धर करा हस्तोच्छ्रितामध्यस्यदोर्जाते द्वित्रियुगांगुलैरपचिता सोक्ता वहिर्मामतः इति मुहूर्त मर्तण्डे उक्तः हस्तोच्छ्राया वेद हस्तैः समंता तुल्या वेदीं सद्मतो वाम भागे विवाहे कन्या हस्तेनैव वेदी निर्माण मिति मुहूर्तचिंतामणौ कन्या हस्तैः पंचभिः सप्तभिर्वा वेदीं कुर्यान्मन्दिरे वाम भागे इति संग्रहे वरस्य दक्षिणे कन्या कन्याया दक्षिणे पिता तस्य दक्षिणतो विप्रा एषाहि वेदिका क्रमः ॥

पश्चादग्ने रहत वस्त्र वेष्टित तृण पूलके कटेवा दक्षिण पादं दत्वा वधूं दक्षिणतः कृत्वा तामुपवेश्य *स्वयमुप विशेत् वरः पूर्ववदग्नि स्थापनं गणपत्यादि पूजन साचार्य्यादि वरणञ्च कृत्वा अद्येत्यादि प्रतिगृहीताया मस्यां वध्वां भार्य्यात्व सिद्धये विवाह होमं करिष्ये ततो दक्षिणतो ब्रह्मासनादि पात्रा सादनं कृत्वा नात्र चरुः पात्रा सादनानन्तरं उप कल्पनीयानि शमी पलाश मिश्रा लाजाः दृषदुपलं लोहित मानडुहं चर्म तदभावे वर्हिषः कुमार्या भ्राता शूर्पं दृढ पुरुषः उदक्कुम्भः आचार्याय वर द्रव्य मिति पवित्र छेदनादि पर्युक्षणान्ते आघारावाज्य भागौ च †जुहुयात् तद्यथा मनसा प्रजापतये स्वाहा इदं० ओं इन्द्राय स्वाहा इदं० ओं अग्नये स्वाहा इदं० ओं सोमाय स्वाहा इदं० ओं व्याहृतीनां प्रजापति र्ऋषिः गायत्र्युष्णिगनुष्टुब्छन्दासि अग्नि वायु सूर्या देवता व्याहृति होमे विनियोगः ओं भूः स्वाहा इदमग्नये ओं भुवः स्वाहा इदं वायवे ओं स्वः स्वाहा इदं सूर्य्याय ओं त्वन्नो अग्ने इत्यस्य वामदेव ऋषिः अनुष्टुब्छन्दः अग्निवरुणौ देवते आज्यहोमे विनियोगः ओं त्वन्नो अग्ने वरुणस्य

---

*तृण पूलकस्य दक्षिण पादेनोल्लंघनं वध्वा सह कृत्वोपरि उपविशेत् इति हरिहर भर्तृयज्ञयो राशयः उल्लंघनं विनैवोप विशेदिदि प्रयोगरत्नाशयः ॥

†पूर्वा घारस्तूष्णीं स्वाहां विना होतव्यः न स्वाहेति वचनान्निरुक्तोहिनो निरुक्तं होता तूष्णीमिति मन्त्र लिंगादिति गदाधराशयः प्रजापतय इति मन्त्रेण होतव्य इति हरिहरादयः ॥

विद्वान् देवस्य हेडो अवयासि सीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्नी वरुणाभ्यां ओं सत्वन्नो अग्ने इत्यस्य महा वाम देव ऋषिः अनुष्टुब्छन्दः अग्नी वरुणौ देवते आज्य होमे विनियोगः ओं सत्वन्नो अग्ने वसो भवोतीने दिष्टे अस्या उषसो व्युष्टौ अवयक्ष्वनो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो नएधि स्वाहा इदमग्नी वरुणाभ्यां नमम ओं अयाश्चाग्न इत्यस्य प्रजापतिः ऋषिः पंक्तिः छन्दः अग्नि देवता आज्य होमे विनियोगः ओं अयाश्चाग्नेस्य नभिशास्ति पाश्च सत्व मित्व मया असि अयानो यज्ञं वहास्ययानो धेहि भेषजꣳ स्वाहा इदमग्न० ओं येते शत मित्यस्य शुनः शेफ ऋषिः त्रिष्टुब्छन्दः वरुणादयो देवता आज्य होमे विनियोगः ओं येते शतं वरुणये सहस्रं यज्ञियाः पाशा वितता महान्तः, तेभिर्नो अद्य सवितोत विष्णु र्विश्वेमुचन्तु मरुतः स्वर्काः स्वाहा इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्चन मम ओं उदुत्तम मित्यस्य शुनः शेफ ऋषिः त्रिष्टुब्छन्दः वरुणो देवता आज्य होमे विनियोगः ओं उदुत्तमं वरुण पाश मस्मद वाधमं विमध्यमꣳ श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय० एता प्रायश्चित्त संज्ञिकाः ततोऽन्वारम्भं विना *अथ

---

*ऋतापाडित्यादि द्वादश मन्त्राराष्ट्र भृत्संज्ञकाः स्वाहा कुर्य्यान्निवाडंतं नवैजुहु द्धविः स्वाहा कारेण हुताग्नौ पश्चान्मन्त्रं समापयेत् एतेषु मन्त्रेषु स्त्री पुंस्त्वादि हेतुर्महीधर भाष्ये ॥

राष्ट्रभृद्धोमः ऋताषाडित्यादि मन्त्राणां प्रजापति ऋषिः यजुः छन्दः ऋताषाड् ऋतधामाग्निर्गन्धर्वो देवता होमे० ओं ऋताषाड् ऋतधामाग्निर्गन्धर्वः सन इदं ब्रह्म क्षत्र पातु तस्मै स्वाहा वाट इदमृतसाहे ऋतधाम्न अग्नये गन्धर्वाय० ओं ऋताषाड् ऋतधामाग्निर्गन्धर्व स्तस्यौषधयो ऽप्सरसो नामताभ्यः स्वाहा इदमोषधिभ्यो प्सरोभ्योमुद्भ्यः ओं सँहितो विश्व सामा सूर्य्यो गन्धर्वः सन इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट इदं संहिताय विश्व साम्ने सूर्य्याय गन्धर्वाय० ओं सँहितो विश्व सामा सूर्यो गन्धर्व स्तस्य मरीचयोप्सरसो आयुवो नामताभ्यः स्वाहा इदं मरीचिभ्योप्सरोभ्य आयुवोभ्यो ओं सुषुम्णः सूर्य रश्मिश्चन्द्रमा गन्धर्वः सन इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट इदं सुषुम्नाय सूर्य रश्मये चन्द्रमसे गन्धर्वाय ओं सुषुम्णः सूर्य रश्मिश्चन्द्रमा गन्धर्व स्तस्य नक्षत्राण्यप्सरसो भेकुरयो नामताभ्यः स्वाहा इदं नक्षत्रेभ्यो प्सरोभ्यो भेकुरीभ्यो० ओं इषिरो विश्व व्यचा वातो गन्धर्वः सन इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट इद निषिराय विश्व व्यच सेवाताय गन्धर्वाय ओं इषिरो विश्व व्यचा वातो गन्धर्व स्तस्यापो प्सरस ऊर्ज्जो नामताभ्यः स्वाहा इदमद्भ्योप्सरसोभ्य ऊर्ग्भ्यः ओं भूज्युः सुपर्णो यज्ञो गन्धर्वः सन इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट इदं भुज्यवे सुपर्णाय यज्ञाय गन्धर्वाय० ओं भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणाप्सरसः तावानामताभ्यः स्वाहा इदं दक्षिणाभ्यो ऽप्सरोभ्यः तावाभ्यो० ओं प्रजापति

विश्वकर्मा मनो गन्धर्व स्तस्य ऋक्सामान्य प्सरस एष्टयोनामताभ्यः स्वाहा इदमृक् सामभ्योप्सरोभ्य एष्टिभ्य इति राष्ट्रभृत् ओं *चित्तञ्च स्वाहा इदं चित्ताय । चित्तिश्च स्वाहा इदं चित्त्यै †आकूतं च स्वाहा इदमाकूताय ओं आकूतिश्च स्वाहा इदमाकूत्यै ओं विज्ञातं च स्वाहा इदं विज्ञाताय ओं विज्ञातिश्च स्वाहा इदं विज्ञात्यै ओं मनश्च स्वाहा इदं मनसे ओं शक्वर्यश्च स्वाहा इदं शक्वरीभ्यः ओं दर्शश्च स्वाहा इदं दर्शाय ओं पौर्णमासञ्च स्वाहा इदं पौर्णमासाय ओं बृहच्च स्वाहा इदं बृहते ओं रथंतरंच स्वाहा इदं रथंतराय ओं प्रजापति र्जया निंद्रायवृष्णे प्रायच्छदुग्रः पृतना जयेषु तस्मै विशः समनमन्त सर्वाः सउग्रः सइहव्यो बभूव स्वाहा इदं प्रजापतये जया निन्द्राय इति जया होमः ‡अथाभ्यातान होमः अग्निर्भूताना मित्यादीनां मन्त्राणां प्रजापति ऋषिः त्रिष्टुप्छन्दः अग्निभूतादयो देवता होमे० ओं अग्निर्भूतानामधिपतिः समावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेस्यामाशिष्य स्याम्पुरोधाया मस्मिन्कर्म्मण्यस्यां देवहूत्या ५ स्वाहा

---

*चित्तं चेत्यादि जया मन्त्राणां चित्ताय स्वाहेति चतुर्थ्यन्ते न होम इति भर्तृयज्ञः नेति कर्कादयः नचेमानि देवता नामानि किं तर्हि मन्त्राश्चैत च यथा म्नातं प्रयोक्तव्याः इति गदाधरादयः ।

†आकूतीत्यादि त्रयोदश मन्त्राणां परमेष्ठिः ऋषिः बृहद्रथन्तर देवता यजुः छन्दः होमे विनियोग ॥

‡अग्नि भूताना मित्यादयः पितरः पितामहा इत्यन्त अष्टादश मन्त्रा अभ्यातान संज्ञा इति हरिहर गदाधरौ अग्नि भूतानामित्यादि सुगन्नः पन्था मित्यन्ता द्वाविंशति रभ्यातान संज्ञा इति कर्क कारिका कारौ ॥

इदमग्नये भूतानामधिपतयेनमम ओं इन्द्रो ज्येष्टाना मधि पतिः समा० इदमिन्द्राय ज्येष्टानाम० ॐ *यमः पृथिव्या अधि पतिः समा० इदं यमाय पृथिव्या अधिप० अत्र प्रणीतोदक स्पर्शः ॐ वायु रन्तरिक्षस्याधिपतिः समा० इदं वायवेन्तरिक्षस्याधिप० ॐ सूर्य्यो दिवोधिपतिः समा० इदं सूर्य्याय दिवोधिप० ॐ चन्द्रमा नक्षत्राणामाधिपतिः समा० इदं चन्द्रमसे नक्षत्राणामाधिप० ॐ बृहस्पति ब्रह्मणो धिपतिः समा० इदं बृहस्पतये ब्रह्मणोधिप० ॐ मित्रः सत्याना माधिपतिः समा० इदं मित्राय सत्याना मधिप० ॐ वरुणोपामधिपतिः समा० इदं वरुणाया पामधिप० ॐ समुद्रः स्रोत्याना माधिपतिः समा० इदं समुद्राय स्रोत्यानामधिप० ॐ अन्न ँ साम्राज्यानामाधिपतिः तन्मावतु० इद मन्नाय साम्राज्याना मधिपत० ॐ सोम ओषधीनामधिपतिः समा० इदं सोमायौषधीनामाधि० ॐ सविता प्रसवानामाधिपतिः समा० इदं सवित्रे प्रसवाना मधि० रुद्रः पशूना मधिपतिः समा० इदं रुद्राय पशूना †मधिप० अत्र प्रणीतोदक

---

*दक्षिणस्यां अन्य पात्रं निधाय तन्मध्ये त्यागः पूर्वे त्यागं परं मृत्यो यम त्यागंतु दक्षिणे पश्चिमे पितृ त्यागं च रुद्र त्यागं तथोत्तरे एष उदक स्पर्शः इति कारिका कारः एके आचार्य्याः प्राशनान्ते एतामाहुति मिच्छन्ति तत्पक्षे परं मृत्यु रिति होमान्ते पुनरेतस्य संस्रवन मिति गदाधर. यमाय दक्षिणे त्यागं इशान्यां रुद्रमेव च दक्षिणाग्नेय यांमध्ये पितृ त्यागा विधीयते एतत्त्यागं स्वयं पात्रे अन्यं देयात्तु प्रोक्षणीं संस्कारे ॥

†ऐशान्या मन्य पात्रं निधाय तन्मध्ये त्यागः संस्कार भास्करे ॥

स्पर्शः ॐ त्वष्टा रूपाणामधिपतिः समा० इदं त्वष्ट्रे रूपाणामधि० ॐ विष्णुः पर्वतानामधिपतिः समा० इदं विष्णवे पर्वतानामधिप० ॐ मरुतो गणानामधिपतय स्तेमावन्त्व० इदं मरुद्भ्यो गणानामधिपतिभ्यो० ॐ पितरः पितामहाः परे वंरेततास्ततामहा इहमावन्त्व० इदं *पितृभ्यः पितामहेभ्यः परेभ्यो वरेभ्यस्ततेभ्य स्तता महेभ्यः अत्र प्रणीतोदक स्पर्शः इति अभ्यातान नामकम्, ततः कन्या वरयो र्मध्ये †ऽन्तर्पटधारणम् अग्निरेत्वित्यादि मन्त्रस्य प्रजापति र्ऋषि रग्निर्देवता त्रिष्टुब्छन्दः होमे विनियोगः ओं अग्निैतु प्रथमो देवताना ꣳ सोस्यै प्रजां मुञ्चतु मृत्यु पाशात् तदय ꣳ राजा वरुणोऽनुमन्यतां यथेय ꣳ स्त्री पौत्र मघंनरोदात्स्वाहा इदमग्नये इमामग्निरिति प्रजापति र्ऋषिः त्रिष्टुब्छन्दः अग्निर्देवता हो० इमा मग्नि स्त्रायतां गार्हपत्यः प्रजामस्यै नयतु

---

*दक्षिणाग्न्योर्मध्ये अन्यं पात्रं निधाय तन्मध्ये त्यागः संस्कार भास्करे ॥

†रौद्रीं पौत्रीं तथा मृत्युं यमाहुतिं कुर्यान्नरः अन्तर्धानं विनायस्तु अल्पायु र्दंपती भवेत् रौद्री पैत्री तथा मृत्यु यमाहुती हुत्वा ह्यपः स्पृशेत् अपां स्पर्शन कालेतु स्पृशेत् प्राणीतिकं जलं इति संस्कार भास्करे ॥

लाजा होमात्प्रागस्मद्देशे ओं जमदग्नि र्भरद्वाजो विश्वामित्रोथ गौत्तमः वासिष्ठः कश्यपो गस्त्यो सप्तैते गोत्रकारका इत्यनेन गोत्र मेलनं कुर्वंति तन्न युक्तं यतः पूर्व मेव दान काले त्रिपुरुष पर्य्यंतं गोत्रोच्चारं कृत्वा कन्या दीयते वरेण गृह्यते गृहीतासावर गोत्राधीना नतु पितुर्गोत्राधीना यतः विधिना संकल्पं कृत्वा वराय दत्तासात एवैतन्न कार्य्यं ॥

दीर्घमायुः अशून्यो पस्था जीवता मस्तु माता पौत्र मानन्द माभि विबुध्यता मिय ँ स्वाहा इदमग्न० ओं स्वास्तिन इति प्रजापतिः ऋषिः त्रिष्टुब्छन्दः अग्नि दैवता हो० ओं स्वास्तिनोग्ने दिव आपृथिव्या विश्वानि धेह्य यथा यजत्रयदस्यां महिदिवि जातं प्रशस्तं तदस्ना सुद्राविणं धेहि चित्र ँ स्वाहा इदमग्नये० ओं सुगन्नु पन्था प्रदिशन्न एहि ज्योतिष्म ध्येह्य जरन्न आयुः अपैतु मृत्यु रमृतंम आगाद्वैवस्वतोनो अभयं कृणोतु स्वाहा इदं वैवस्वताय अत्र प्रणीतोदक स्पर्शः परं मृत्यु रिति कुत्स ऋषिः मृत्युर्देवता त्रिष्टुब्छन्द होमे० ओं परं मृत्यो अनुपरेहि पन्था यस्ते अन्य इतरो देव यानात् चक्षुष्मते शृण्वते ब्रवीमि मानः प्रजा ँ रीरिषामोतवीरान् स्वाहा इदं मृत्यवे अत्र प्रणीतोदक स्पर्शः ततो वधू *मग्रतः कृत्वा वधूवरौ प्राङ् मुखौ स्थितौ भवतः ततो वरांजलि पुटो परि संलग्न वध्वंजलिस्थ घृताभिघारित भ्रातृ दत्त शर्मी पलाश मिश्रै †लाजे वधू कर्तृको मन्त्र पाठ पूर्वको

---

*कामस्त्व घोप वाणैः स्वैः प्रहरेदति दारुणैः तस्मादग्रे भवेत्कन्या तस्य वाणस्य शांतये कन्यकाग्रे वरं कृत्वा ब्राह्मणो ज्ञान दुर्बलः विधवा जायते नारी निषिद्ध स्तत्र कारणात् अग्रेतु शुभदा पत्नी मांगल्ये सर्व कर्म्मणि पदेपदं स्वमेधंच धनायुः पुत्र वर्धनं लाजानाज्यं स्रुवं कुम्भं ब्रह्माण मृत्विजं गुरुं एतेषां वाह्यतः कृत्वा शेषाणांतु प्रदक्षिणा ॥

†भृष्टव्रीहिर्भवेल्लाजा शमीदल विमिश्रिता कन्या होमं प्रकुर्वीत भर्तुर्भ्रातुश्च संगमे संस्कार भास्करे शमी पलाश मिश्रेति यदेवहवः पलाश शब्देन पलाश वृक्ष पत्राणि स्वीकुर्वंति तन्न युक्तं पलाश शब्देन चात्र पत्राण्येव ग्राह्याणि हरिहर भाष्ये पत्र ग्राह्यत्वात् अतः शमी पत्राणि ग्राह्याणि ॥

वि०

होमः *तिष्ठन्त्ये वजुहोति वधूः अर्य्यम्ण मिति मन्त्रस्य दध्यङ्ङाथर्वण ऋषि रनुष्टुप्छन्दः
अग्नि र्देवता लाजा होमे० ओं अर्य्यमणं देवं कन्या अग्नि मयक्षत सनो अर्यमा
देवः प्रेतो मुंचतु मापतेः स्वाहा इद मर्यम्णे इयं नारीति दध्य० ऋषिः अनु० छन्दः
अग्नि र्देवता लाजा० ओं इयं नार्युपब्रूते लाजानावपंतिका आयुष्मानस्तु मेपतिरेध
न्तां ज्ञातयो मम स्वाहा इदमग्नये इमांल्लाजेति मन्त्रस्य दध्य० ऋषिः अनु० छन्दः
अग्नि र्देवता लाजा० ओं इमांल्लाजानावपाम्यग्नौ समृद्धि करणं तव मम तुभ्यंच
संवननं तदग्नि रनुमत्यता मिय ᳪं स्वाहा इद मग्नये ततो वधू दक्षिण हस्तं सांगुष्ठं
गृह्णाति वरः ओं गृभ्णामीति मन्त्राणां याज्ञवल्क्य भारद्वाजाथर्वण प्रजापतय ऋषयो
भगो देवता त्रिष्टुबुष्णिगनुष्टुव् यजुः छन्दांसि पाणि ग्रहणे विनियोगः ओं गृभ्णामि
तेसौभगत्वाय हस्तं मया पत्या जरदष्टि र्यथासः भगो अर्यमा सविता पुरंधि र्मह्यं

वि०

---

* तिष्ठन्ती तिष्ठता पत्या गृहीतां जलिरेवसा अंजलि स्थान् त्रिधा सर्वान्प्राङ् मुखी षतिसत्रतः प्राजापत्येन तीर्थेन दैवे नवेति बह्वचाः इति कारिकायां द्रव्यत्यागस्तुवरस्य कर्तृत्वं स्वामि फल योगादिति गदाधरः लाजा होमं समिद्धोमं मूर्ध्नि होमं तथैवच पूर्णाहुतिं वसोर्धारां तिष्ठैवहि सर्वदा सस्कार भास्करे ।

लाजा होमे सर्वे विद्वांसः कौसुंभ सूत्रेण वधू वरयोर्हस्तौ बध्नन्ति तन्न युक्तं सूत्रेऽनुक्तत्वात् हस्त वंधने ऽग्नि परिक्रमणे वधू वामतो ग्निर्भवति धर्म्म शास्त्रे ब्राह्मण देवादिनां दक्षिणतः करणत्व मुक्तं धर्म्म शास्त्र स्यानादरात् अपरं चाग्रे गृभ्णामिते सौभगत्वायेति मंत्रेण वरो वधू सांगुष्ट हस्त ग्रहणं करोति वंधने तत्कथं कार्य्य मत एव विद्वज्जनैर्हस्त बन्धनं नकार्य्यं यत्सूत्रे प्रोक्तं तत्कार्य्यं साहसो नकार्य्यः ॥

त्वादुर्गार्हं पत्यायदेवाः १ अमोहमस्मि सात्व ꣳ सात्व मस्यमो अहंसामाह मस्मि ऋक् त्वं द्यौरहं पृथिवी त्वं २ तावेव विवहावहै सहरेतो दधावहै प्रजांप्रजनयावहै पुत्रान् विन्द्यावहै वहून् ३ ते सन्तु जरदष्टयः सांप्रियौ रोचिष्णू सुमनस्य मानौ पश्येम शरदः शतं जीवेम शरदः शत ꣳ शृणुयाम शरदः शतं ४ अथैना मश्मानमारोहयति वरो *वाम हस्तेन वधूदक्षिण पाद मारोहयत्युत्तरतोग्नेः आरोहेम मिति अथर्वण ऋषिः अनुष्टुब्छन्दः वधूर्देवता अश्मा रोहणे विनियोगः ओं आरोहेम मश्मान मश्मेवत्व ꣳ स्थिराभव अभितिष्ठ पृतन्यतो विवाधस्वपृतनायतः इति मन्त्रेग, अथारूढायामे वतस्यां वरो गाथां गायति ओं सरस्वतीति मन्त्रस्य विश्वावसु ऋषिः अनुष्टुब्छन्दः सरस्वती देवता गाथा गाने विनियोगः ओं सरस्वती प्रेदमवसुभगे

---

*दक्षिण पाणिनेति रेण्ड दीक्षितः वरेण वाम हस्तेन वधू पादं च दक्षिणं शिलामारोहयेत् प्राञ्चः मंगलानि यथा क्रम मिति संस्कार भास्करे चात्र वहवः आधुनिका दृषदुपल मित्यत्र दृषद्वत्थानद्या उपल मिति तृतीया तत्पुरुषं मन्यन्ते तन्नयुक्तं व्याकरणे द्वंद्वस्य स्वीकृतत्वात् उक्तंच द्वय मन्यत्रापि श्रौत पदार्थ निर्वचते पाषाण निर्मिता द्रव्याश्रय भूता दृषदुच्यते पाषाण निर्मिता द्रव्यपेषण साधन भूता उपलोच्यतेति प्रत्यग्दृषद सोपलां प्रतिष्ठाप्येति प्रयोग रत्ने द्रष्टव्यं विद्वाद्भि र्येतु दृषदुपल पदेनैकस्यैव ग्रहणं कुर्वंति तेत्वज्ञा अर्थस्यानभिज्ञत्वात् शक्ति रूपेण या शैली शिव रूप शिलापतिः उभावङ्गुष्ठ संस्पर्शात् साकन्या विधवा भवेत् संस्कार भास्करे अनेनापि द्वयं ग्राह्यं वासुदेवेन कुमार्या दक्षिण पादं हस्तेम गृहीत्वा अश्मान मुपरि वरः करोतीत्युक्तं कारिकायां गत्वोभावुत्तरेण अग्निं तस्याः सव्येनादाय हस्तेन वधू पादन्तु दक्षिणं शिला मारोहयेत्प्रागायतां दक्षिण पाणिना पदं अथैना मश्मा नमारोहयत्युतरतोग्ने दक्षिण पादेन ॥

वाजिनी वतीयांत्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः यस्यां भूत ँ् सम्म भवद्यस्यां विश्व मिदं जगत्, तामद्य गाथां गास्यामि यास्त्रीणामुत्तमं यशः, ततोग्रे वधूः पश्चाद्वरो *ग्नि प्रदक्षिणं कुरुतः तत्र वर पठनीयो मन्त्रः तुभ्यमग्र इति मन्त्रस्याथर्वण ऋषिः अनुष्टुछन्दः अग्नि र्देवता प्रदक्षिणा करणे विनियोगः ओं तुभ्यमग्रे पर्य्य वहन् सूर्य्यां वहतुना सह पुनः पतिभ्यो जायांदाग्ने प्रजया सह ततः पश्चादग्नेः स्थित्वा लाजा होम सांगुष्ठ हस्त ग्रहणा श्मारोहण गाथा गानाग्नि प्रदक्षिणानि पुनरपि द्विस्तथैव एतेन नव लाजा हुतयः सांगुष्ठ हस्त ग्रहण त्रयं अश्मा रोहण त्रयं गाथा गान त्रयं प्रदक्षिणा त्रयं च संपद्यते ततोऽवशिष्ट लाजैः कन्या भ्रातृ दत्तै रंजलिस्थ शूर्प कोणेन वधू †र्जुहोति ओं भगाय स्वाहा इदं भगाय समाचारात्तूष्णीं चतुर्थ परिक्रमणं नेतरथा वृत्तिः अग्रेवरः पश्चाद्वधूः पुनः पश्चादग्नेः प्राग्वदुपविश्य

---

*वधू वरावग्निं प्रदक्षिणी कुर्वन्ता वन्तरा गत्वा तन्मध्ये एव गच्छता मिति गदाधरः दम्पती गच्छतस्तत्र ब्रह्माग्नी अन्तरागति रिति रेणुर्दीक्षिताः ॥

†विवाहे मन्त्राधिकारिणः कारिकायां लाजा होम त्रये मन्त्रानश्मा रोहणे तथा भागेय चैक मन्त्रंच कन्या पठतिपञ्चकम्, ध्रुव दर्शन कालेच षष्ठश्चैवोदा हृतः, कन्या वस्त्र परिधाने तथैव चोत्तरीयके तथा समीक्षा कालेतु पितुर्निष्क्रमणे गृहात् अश्मनो रोहणे चैव हस्त ग्राहे तथैव च तथा सप्त पदेचैव वधू मूर्धाभिषेचने हृदया लम्भने चैव तथाचैवाभि मन्त्रणे दृढ पुरुषे क्रमेणैव चैतान्मन्त्रान्वरः पठेव वधू वरस्य पितरौ वधू वरौ तथैव च विवाहे मन्त्र पाठाच्च अपरोनैव बोधकः ॥

वरो ब्रह्मणान्वारब्धः प्राजापत्य होमं कुर्य्यात् ओं प्रजापतये स्वाहा इदं प्र० प्रोक्षणी पात्रे हुतशेषाज्य प्रक्षेपः *अग्नेरुत्तरतोऽथैनां वधू मुदीचीं सप्त पदानि प्रक्रामयति वरो वक्ष्यमाण मन्त्रैः शिष्टाचाराद्वेद्युत्तरतो वेदीमारभ्य उत्तरोत्तरं हस्तांतराले धान्य सप्ताचलान्कृत्वा वरः प्रति पदुती स्थनेन मन्त्रेण संपूज्य तेषु वधू प्रतिज्ञा पाठन पुरः सरं मन्त्रं पठित्वा वध्वा दक्षिण पादं स्पर्शयति याम्यमारभ्य उदक् संस्थं उत्तरत उत्तरं वरः देश काल कीर्तनान्ते प्रतिगृहीत स्वदार सिध्यर्थं सप्ताचल पूजनं करिष्ये ओं प्रतिपदसि प्रतिपदे त्वा नुपदस्य नुपदे त्वा संपदसि संपदे त्वा तेजोऽसि तेजसे त्वा इति मन्त्रेण संपूज्य वधू पदं क्रामयति ओं एकमिषे विष्णुस्त्वा नयतु इति वरेणोक्तेन मन्त्रेण वधूर्दक्षिणैक पदं दद्यादुदक् तदनन्तरं वाम पादं व्यर्थम् पुनर्दक्षिण पद दाने मन्त्र मुक्त्वा एवं सर्वत्र ओं द्वे ऊर्ज्जे विष्णुस्त्वानयतु इति द्वितीयं ओं त्रीणिरायस्पोषाय विष्णुस्त्वा नयतु इति तृतीयं ओं चत्वारिमायोभवाय

---

*अग्नेरुत्तरतः एनां वधूं दक्षिण पादेन सप्त वारं पादेक्रमं कारयति वर इति हरिहर गदाधरादयः कुमार्य्या दक्षिणं पादं गृहीत्वा स्थापयतीत्यन्ये विष्णु स्त्वानयत्विति षड् मन्त्रेष्वनुषज्यतेन सप्तम इति कर्कः प्रक्रमेतु वाम पादस्य नाक्रमण मिति रेणु दीक्षितः अन्येषां आचार्य काराणां मते विष्णु पदस्यानुषंगः वध्वा दक्षिण पादान्यै सप्तानि प्रक्रमेत्तु सा याम्या दुदगादिक् संस्थायां प्रक्रमे दुत्तरोत्तरम् गमये दक्षिण पादान्तरं वामान्तरर्यकानिति संस्कार भास्करे ॥

विष्णुस्त्वा नयतु इति चतुर्थं ओं पंच पशुभ्यो विष्णुस्त्वा नयतु इति पंचमं ओं षड् ऋतुभ्यः विष्णुस्त्वा नयतु इति षष्ठम् ओं सखे सप्तपदा भव सामा मनुव्रता भव विष्णुस्त्वा नयतु इति सप्तमं परिक्रमणेन स्वस्थानोपवेशनं केचित्प्रतिपदंकन्ययैकैक प्रतिज्ञा मन्त्रः पठनीयस्तेच यथा सुख दुःखानि सर्वाणि त्वया सह विभज्यच यत्रत्वं तदहं तत्र प्रथमेसा ब्रवीदिदं, कुटुम्बं रक्षयिष्यामि आवृद्ध बालकादिकं अस्ति नास्तीति पश्यामि द्वितीये साब्रवीदिदं २ भर्तृ भक्तिरता नित्यं सदैव प्रिय भाषिणी भविष्यामि पदेचैव तृतीयेसा० ३ आर्ते आर्ता भविष्यामि सुख दुःख विभागिनी तवाज्ञां पालयिष्यामि कन्या तुर्ये पदे ब्रवीत् ४ ऋतु काले शुचि स्नाता क्रीडिष्यामि त्वया सह नाहं परतरं गच्छे कन्या पंच पदे ब्रवीत् ५ इह साक्षीचनो विष्णु स्त्वयाहं नैव वंचिता उभयोः प्रीतिः संभूता कन्या षष्ठ पदे ब्रवीत् ६ होम यज्ञादि कार्येषु भवामिच सहायिनी धर्मार्थ काम कार्येषु कन्या सप्त पदे ब्रवीत् ७ इति कन्या मन्त्राः इति सप्तपदी करणं ततोग्नेः पश्चादुपविश्य पुरुष स्कन्ध स्थित कुम्भादाम्र पल्लवेन जल मानीय तेन वरो *वधू मभिषिंचति आप इति प्रजापति ऋषिः लिंगोक्ता देवता

---

*सिंहासने रथारोहे दम्पत्योः पाद क्षालने अभिषेके सौख्य कृत्ये तिष्ठेत्पत्नीतु वामतः श्राद्धे सदैव वामांगे पत्नी चोदक माहरेत् वृद्धि श्राद्धादि मांगल्ये दक्षिणांगे सदा भवेत् ॥

सुप्रतिष्ठा छन्दः मूर्ध्न्यभिषेचने विनियोगः ओं आपः शिवाः शिवतमाः शांताः शांततमाः तास्ते कृण्वन्तु भेषजं इत्यनेन पुनः कुंभात् तथैवानीय जलेनात्मानं वधूं चाभिषिंचति आपोहिष्ठेत्यादि तृचस्य सिन्धु द्वीप ऋषिः गायत्री छन्दः आपो देवता मूर्ध्न्यभिषेचने विनियोगः ओं आपो हिष्ठा मयोभुव स्तान ऊर्ज्जे दधातन महेरणाय चक्षसे ओं योवः शिव तमो रस स्तस्य भाजयतेहनः उशतीरिव मातरः ओं तस्मा अरंग मामवो यस्य क्षयाय जिन्वथ आपो जन यथाचनः ततः *सूर्य मुदीक्षस्वेति वधूं संबोध्य वरो वन्देत् तच्चक्षुरिति मन्त्रस्य दध्यङ्ङाथर्वण ऋषिः अक्षरातीत पुर उष्णिक् छन्दः सूर्योदे०सूर्योद्वीक्षणे विनियोगः ओं तच्चक्षुर्देव हितं पुरस्ता च्छुक्र मुच्चरत् पश्येम शरदः शतं जीवेम शरदः शत ँ शृणुयाम शरदः शतं प्रब्रवाम शरदः शत मदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् इति पठित्वा वधूं सूर्यं दर्शयति अस्तमिते सूर्ये ध्रुव मुदीक्षस्वेति प्रैषानन्तरं ध्रुवं पश्यति वधूः तत्र वर पठनीयो मन्त्रः ओं ध्रुवमसि ध्रुवंत्वा पश्यामि ध्रुवैधि पोष्या मयि मह्यंत्वादाद्बृहस्पति र्मया पत्या प्रजावती संजीव शरदः शत मिति दृष्ट्वासा यदिन पश्यति तदापि पश्यामीति ब्रूयात् अथ वरो वधू दक्षिणां सस्योपरि हस्तं नीत्वा तस्या हृदय मालभेत् ममव्रते

---

*सूर्यावलोकनं दिवा विवाहे भवतीति रेणु कारिका हरिहरौ सूर्यावेक्षणस्या न्यथा नुपपत्त्या ऽस्तमिते ध्रुवं दर्शयती, त्यत्राऽस्तमित ग्रहणाच्च एतद्गृह्यानुसारिणां दिवैव विवाहोन रात्राविति गदाधरः ॥

इति मन्त्रस्य परमेष्ठी ऋषिः त्रिष्टुब्छन्दः प्रजापति र्देवता हृदयालम्भने विनियोगः ओं मम व्रतेते हृदयं दधामि मम चित्त मनु चित्तंते अस्तु मम वाचमेक मना जुषस्व प्रजापतिस्त्वा नियुनक्तु मह्यं इति मन्त्रेण *अथ वधूमभि मन्त्रयति वरः पश्चात् सुमंगलीरिति प्रजापति र्ऋषिः अनुष्टुब्छन्दः विवाहाधिष्ठातृ देवता वध्वभि मन्त्रणे विनियोगः ओं सुमंगली रियं वधू रिमाँ समेत पश्यत सौभाग्य मस्यै दत्वा याथास्तं विपरेतन इति मन्त्रेण अत्र समाचाराद्वधूं वरस्य वाम भागे उपवेशयन्ति वरस्य वामांगे उपविष्टा कन्या वरं प्रति प्रतिज्ञा वचनानि ब्रूते कन्योवाच तीर्थ व्रतोद्यापन यज्ञ दानं मयासहत्वं यदि किं न कुर्याः वामांग मायामि तदा त्वदीयं जगाद वाक्यं प्रथमं कुमारी हव्य प्रदानै रमरान् पितृंश्च कव्य प्रदानै र्यदि पूजयेथाः वामांग मायामि तदात्वदीयं जगाद कन्या वचनं द्वितीयं कुटुम्ब रक्षा भरणे यदि त्वं कुर्याः पशूनां परिपालनंच वामांग मायामि तदात्वदीयं जगाद कन्या वचनं तृतीयं आय व्ययौ धान्य धनादिकानां पृष्टा, निवेशे प्रगृहं निदध्याः वामांग मायामि तदात्वदीयं

---

*वध्वाः सीमन्ते वरः सिन्दूरं ददातीति प्रयोगरत्ने अनामिकाग्रेण वधू शिरसि अभिमन्त्रण मित्यन्ये अत्र समाचारा श्चतस्रः स्त्रियो मंगलं कुर्वीरन् पति पुत्रान्विता भव्या श्चतस्रः सुभगा अपि सौभाग्य मस्यैदद्युः स्तांमंगलाचार पूर्वक मिति रेणुदीक्षिताः ॥

जगाद कन्या वचनं चतुर्थं देवालया राम तडाग कूप वापी र्विदध्या यदि पूजयेथाः वामांगमायामि तदा त्वदीयं जगाद कन्या वचनंच पंचमं देशान्तरे वास्व पुरांतरे वायदा विदध्याः क्रय विक्रयौ त्वम वामांग मायामि तदा त्वदीयं जगाद कन्या वचनं च षष्ठं नसेवनीया परपारकीया त्वया भवोद्भावन कामिनीति वामांग मायामि तदा त्वदीयं जगाद कन्या वचनंच सप्तमं वर उवाच मदीय चित्तानुगतंच चित्तं सदा मदाज्ञा परिपालनंच पतिव्रता धर्म्म परायणत्वं कुर्य्याः सदा सर्व मिमं प्रयत्नं इति मिथः प्रतिज्ञां कुर्वीयातां अथाग्नेः प्रागुदग्वा नुगुप्तं आगारं पूर्व कल्पितं भवति तस्मिन्नानडुहं रोहित चर्म प्राग्ग्रीवं उपरि लोमास्तीर्णं भवति कलौ तदभावे प्रागग्रानुदगग्रान्वा कुशानास्तृणुयात् तदुपरितां वधूं प्रत्यङ् मुखीं *दृढ पुरुष उन्मथ्योत्क्षिप्यापवेशयति ओं इह गावो निषीदं त्विहाश्वा इह पूरुषाः इहो सहस्र दक्षिणो यज्ञ इह पूषा निषीदतु इति मन्त्रेण केचित् जामातरं दृढ माचक्षते तत्र जामातै वोत्क्षिप्योपवेशयति तत आगत्य पूर्व वधूया स्थानं वरो दक्षिणत उपविश्य स्विष्ट कृद्धोमं कुर्यात् ओं अग्नये स्विष्ट कृते स्वाहा इदम० ततः संस्रव प्राशनं पूर्ण पात्र

---

*पुरुषः कश्चिद्बलवान् पुरुष इति हरिहरः दृढ पुरुषो जितेन्द्रिय इति भर्तृ यज्ञः जामातैव दृढ पुरुष इति रेणुदीक्षित गंगाधराः ॥

दानं हवन दक्षिणां यज्ञांत दक्षिणां दत्वा भूयसीं दक्षिणां दद्यात् ब्रह्म ग्रन्थि विमोकः ओं सुमित्रियान आप ओषधयः सन्तु इति प्रणीता जलेन पवित्रे गृहीत्वा शिरः संमृज्य दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यंचवयं द्विष्मः इत्यैशान्यां सपवित्रां सजलां प्रणीतां न्युब्जी कुर्य्यात् तत स्तरण क्रमेण वर्हिरुत्थाप्याज्येना वघार्य्य वक्ष्यमाण मन्त्रेण जुहुयात् ओं देवागातु विदोगातुं वित्वागातु मित मनस्पत इमं देव यज्ञ ँ स्वाहा वातेधाः इति तत उत्थाय वध्वा दक्षिण हस्तेन स्पृष्टैः स्रुवस्थ घृत पुग फलैः *पूर्णाहुतिं कुर्यात् मूर्धान मिति मन्त्रस्य भरद्वाज ऋषिः वैश्वानरो देवता त्रिष्टुप्छन्दः पूर्णाहुति होमे विनियोगः ओं मूर्धानं दिवो अरतिं पृथिव्या वैश्वानर मृत आजात मग्निं कवि ँ सम्राज मतिथिं जनाना मासन्ना पात्रं जनयन्त देवाः स्वाहा तत उपविश्य स्रुवेण भस्मानीय दक्षिणा नामिका गृहीत भस्मना त्र्यायुषं जमदग्ने रिति ललाटे कश्यपस्य त्र्यायुष मिति ग्रीवायां यद्देवेषु त्र्यायुष मिति दक्षिणांसे तन्नो अस्तु त्र्यायुष मिति हृदि अनेनैव क्रमेण वध्वा अपि त्र्यायुषं कुर्यात् तन्ना इत्यत्र तवे इति विशेषः तत्राचारात् शण शंख शमी स्वर्ण प्रेरितं सिंदूर करणं वर कर्तृकं ततोन्यैरपि प्रतिष्ठित स्त्री पुंसैः सिन्दूर करणं †ग्राम्य वचनं वरः कुर्य्यात्

---

*विवाहादि क्रियायांच शालायां वास्तु पूजने नित्य होमे वृषोत्सर्गे पूर्णाहुतिं न कारयेदिति प्रयोग रत्ने ॥

†विवाह श्मशानयोर्ग्रामं प्रविशतादिति वचनात् तस्मात्तयोर्ग्रामः प्रमाण मिति श्रुतेः ॥

ग्राम्याः स्त्रियः, तत स्त्रिरात्र मक्षार लवणाशिना वधः शायिनौ निवृत्त मैथुनौ भवतः ॥

श्री १०८ सकल शास्त्र प्रवीण गांभीर्य्यैश्वर्य्यादि गुण सम्पन्नानां
श्री १०८ पं० गंगाधर शास्त्रिणां चरणैक निलयेनोधमपुर
निवासि श्रीपंडित वीणा प्रपौत्रेण श्री चन्द्रमौल्यात्मजेन
वाल ब्रह्मचारिणा नित्यानन्द शर्म्मणा संगृहीतो
विवाह विधिः समाप्ति मगात् ॥

श्री गणेशायनमः ।

अथ चतुर्थी कर्म्म प्रारम्भः ।

तत्र चतुर्थ्या मपर रात्रे चतुर्थी कर्म्म तच्च गृहाभ्यन्तर एव कार्य्यं तत उद्वर्तनादि कृत्वा वधू वरौ प्राङ् मुखौ भवतः ततो वर अद्येत्यादि विवाहांगं चतुर्थी कर्म्म तदंगतया गणपत्यादि पूजन महं करिष्ये ततः पूर्वं वद्गणपत्यादि पूजनं कुर्य्यात् ततः कुशकण्डिका पूर्वं समाद्यं विशेषोत्र प्रणीता स्थानादुत्तरतः उद पात्र स्थापनं ततः प्रणीता प्रणयनाद्याज्य भागान्तं पूर्ववत् ततः स्थाल्याज्येन पंचाहुतयो होतव्याः प्रत्याहुत्यनन्तरं स्रुवावस्थित हुत शेषस्य प्रोक्षणी पात्रे प्रक्षेपः ततो होमस्तद्यथा ओं अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ काम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा इदमग्नये वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ काम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा इदं वायवे सूर्य्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वां

नाथ काम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा इदं सूर्याय ओं चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ काम उपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा इदं चन्द्रमसे ओं गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथ काम उपधावामि यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा इदं गन्धर्वाय ततः स्थाली पाकेन प्रजापतये स्वाहा अग्ने प्रायश्चित्त इत्यादि प्रजापत्यन्तानां षडाहुतीनां संस्रवमुद पात्रे प्रक्षिपेत् केषांचिन्मते स्विष्टकृतोपि संस्रवं प्रक्षिपेत् अन्यासामाहुतीनां पात्रान्तरे संस्रवान् प्रक्षिपेत् ततोग्नये स्विष्टकृते हुत्वाऽऽज्येन महा व्याहृत्यादि प्रजापत्यन्तानवाहुतीर्वा जुहोति ततः संस्रव प्राशनं आचम्य अग्नेत्यादि पूर्ण पात्रं दत्वा ततः उदपात्रादुदकमादाय वधूं मूर्धन्याभिषिञ्चति या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निंदिता तनू जारघ्नीं तत एनां करोमि सा जीर्य्यत्वं मया *सहासाविति इत्यनेन अथ वरो वधूं स्थाली पाकं हुत शेषं सकृत्प्राशयति ओं प्राणैस्ते प्राणान्त्सन्दधामि

---

*असौ स्थाने नाम ग्रहणं कार्यम्, अत्र समाचाराद्वरोऽपि कन्या हस्तेन भोजनं करोत्विति गदाधरः स्त्रिया सह भोजनेपि न दोष इत्याह हेमाद्रौ प्रायश्चित्त काण्डे गालवः एक यान समारोह एक पात्रे च भोजनं विवाहे पथि यात्रायां कृत्वा विप्रो न दोष भाक् अन्यथा दोष माप्नोति पश्चाच्चान्द्रायणं चरेत् मिताक्षराया मप्येवमेव ॥

अस्थिनिरस्थीनि मा ꣳ सैर्मा ꣳ सानित्वचा त्वचामिति अनेन मन्त्रेण साच भर्त्रा मन्त्रे पठिते प्राश्नाति ततः पूर्णाहुति होमः कंकण विमोकश्च इति शुभम् ॥

श्री १०८ सकल शास्त्र प्रवीण गाम्भीर्य्यैश्वर्य्यादि गुण सम्पन्नानां
श्री १०८ पं० गङ्गाधर शास्त्रिणां चरणैक निलयेनोधमपुर
निवासि श्रीपण्डित वीणा प्रपौत्रेण श्री चन्द्रमौल्यात्मजेन
बाल ब्रह्मचारिणा नित्यानन्द शर्म्मणा संगृहीतं
चतुर्थी कर्म्म समाप्ति मगात् ॥

श्री गणेशायनमः ।

अथार्क विवाह विधिः ।

तृतीयादि निषेध माह काश्यपः तृतीयां मानुषीं नैव चतुर्थीं यः समुद्वहेत् पुत्र पौत्रादि सम्पन्नः कुटुम्बी साग्निको वरः उद्वहेद्रति सिध्यर्थं तृतीयां न कदाचन मोहादज्ञानतो वापि यदि गच्छेत्तु मानुषीं नश्यत्येव न संदेहो गर्गस्य वचनं यथा अन्यत्रापि तृतीयां यदि चोद्वाहे त्तर्हि सा विधवा भवेत् संग्रहे तृतीयां यदि चोद्वाहे त्तर्हि सा विधवा भवेत् चतुर्थादि विवाहार्थं तृतीयार्कं समुद्वहेत् आदित्य दिवसे वापि हस्तर्क्षे वा शनैश्चरे शुभे दिने वा पूर्वाह्ने कुर्य्यादर्कं विवाहकं देशादि ब्रह्म पुराणे ग्रामात्प्राच्या मुदीच्यां वा सपुष्प फल संयुतं परीक्ष्यार्कं ततो धस्ता त्स्थंडिलादि यथा विधि व्यासः स्नात्वालंकृत वासास्तु रक्त गन्धादि भूषितं सपुष्प फल शाखैक मर्क गुल्मं समाश्रयेत् संलक्षणे संयुक्त मर्कं संस्थाप्य यत्नतः अर्क कन्या प्रदानार्थं माचार्य्यं कल्पयेत्पुरा अर्क सन्निधि मागत्य

तत्र स्वस्त्यादि वाचयेत् नान्दी श्राद्धे हिरण्येण अष्ट वर्गान्प्रपूजयेत् पूजयेन्मधुपर्केन वरं विप्रस्य हस्ततः यज्ञोपवीतं वस्त्रंच हस्त कर्णादि भूषणं उष्णीष गन्ध माल्यादि वरायास्मै प्रदापयेत् स्वशाखोक्त प्रकारेण मधुपर्कं समाचरेत् ब्रह्म पुराणे यथा विधीत्य स्यानन्तरं कृत्वार्कं पुरतस्तिष्ठन् प्रार्थयेत् द्विजोत्तमः त्रिलोक वासिन् सताश्व छायया सहितो रवे तृतीयो द्वाहजं दोषं निवारय सुखं कुरु तत्राध्यारोप्य देवेशं छायया सहितं रविम् वस्त्रै र्माल्यै स्तथा गंधै स्तन्मंत्रेणैव पूजयेत् तन्मंत्रेणा आकृष्णेने त्यर्थः अन्यत्रापि श्वेत वस्त्रेण संवेष्टय तथा कर्पास तंतुभिः ॥ गंध पुष्पैः समभ्यच्चर्या *ब्लिंगै रभिषिच्य च गुडौदनंतु नैवेद्यं ताम्बूलं च समर्पयेत अर्कं प्रदक्षिणां कुर्वन् जपेन्मंत्र मिमं बुधः मम प्रीति करायेय म्मया सृष्टा पुरातनी अर्कजा ब्रह्मणा सृष्टा अस्माकं परिरक्षतु पुनः प्रदक्षिणां कुर्यान्मंत्रेणानेन मंत्र वित् नमस्ते मंगले देवि नमः सवितु रात्मजे त्राहिमां कृपया देवि पत्नी त्वं मे इहा गता अर्कत्वं ब्रह्मणा सृष्टः सर्व प्राणि हितायच वृक्षाणा मादि भूतस्त्वं देवानां प्रीति वर्द्धनः तृतीयो द्वाहजं पापं मृत्युं चाशु विनाशय ततश्च कन्या वरणं त्रिपुरुषं कुल मुच्चरेत् आदित्यः सविता सूर्य्यः पुत्री पौत्रीच नप्त्रिका गोत्रं काश्यक इत्युक्तं लोके लौकिक माचरेत् सुमुहूर्तेऽर्कं निरीक्षेत स्वस्ति

आपोहिष्ठेत्यादिभिः।

सूक्त मुदीरयन् आशीर्भिः सहिता कुर्य्यादाचार्य्य प्रमुखैः द्विजैः अथाचार्य्यं समाहूय विधिना तन्मुखा च्चतां प्रतिगृह्य ततो होमं गृह्योक्त विधिना चरेत् आचार्य्यस्य दान मन्त्र माह व्यासः अर्क कन्या मिमां विप्र यथा शक्ति विभूषितां गोत्राय शर्म्मणे तुभ्यं दत्तां विप्र समाश्रयेति अंजल्यक्षत कर्म्माणि कृत्वा कंकण पूर्वकं यावत्पंचावृतं सूत्रं तावदर्कं प्रदर्शयेत् स्वशाखोक्तेन मन्त्रेण गायत्र्या वाथवा जपेत् पंचीकृत्स्य पुनः सूत्रं स्कन्धे वध्नाति मन्त्रतः *बृहत्सामेति मन्त्रेण सूत्र रक्षां प्रकल्पयेत् अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्तथा कुम्भांश्च निक्षिपेत्पश्चादाग्नेयादि चतुष्टये सवस्त्रं प्रति कुम्भं च त्रिः सूत्रेणैव वेष्टयेत् हरिद्रा गंध संयुक्तं पूरयेच्छीतलं जलं प्रति कुम्भ म्महा विष्णुं संपूज्य परमेश्वरं पाद्यार्घ्यादिनै वेद्यान्तं कुर्य्यान्ना म्नैव मन्त्रवित् । अत्र होम प्रकारः शौनकेन प्रदर्शितः तृतीये स्त्री विवाहेतु संप्राप्ते पुरुषस्य तु अर्क विवाहं वक्ष्यामि शौनकोहं विधानतः अर्क सन्निधि मागत्य तत्र स्वस्त्यादि वाचयेत् नान्दी श्राद्धं प्रकुर्वीत स्थंडलञ्च प्रकल्पयेत् अर्क मभ्यर्च्य सौर्य्यांच गन्ध पुष्पाक्षतादिभिः सौर्य्या सूर्य्य देवत्यया आकृष्णेनेति॥ स्वयं चालं कृतस्तद्वद्वस्त्र माल्यादिभिः शुभैः अर्कस्योत्तर देशेतु समन्वारब्ध ⊛एतया उल्लेखनादिकं कुर्य्यात् आघारान्तमतः परं आज्याहुतिंच

कन्यया।

जुहुयात्संगोभिरनयैकया यस्मैत्वा कामकामायेत्यतयार्चा ततः परं व्यस्ताभिश्च समस्ताभि स्ततश्च स्विष्ट कृद्भवेत् परिषेचन पर्यन्त मयाक्षेत्यादिकं क्रमात् प्रार्थना मन्त्रादि विशेष माह व्यासः पुनः प्रदक्षिणं कृत्वा मन्त्र मेत मुदीरयेत् महाकृत मिदं कर्म्म स्थावरेषु जरायुणा अर्कापत्या निनोदेहि तत्सर्वं क्षन्तु मर्हसि इत्युक्त्वा शान्ति सूक्तानि जप्त्वा तं विसृजेत्पुनः गोयुग्मं दक्षिणां दद्यादाचार्यायच भक्तितः इतरेभ्योपि विप्रेभ्या दक्षिणां चाभि शक्तितः तत्सर्वं गुरवे दद्यादन्ते पुन्याह माचरेत् अत्र पंचम दिने कर्तव्य मुक्तं ब्रह्म पुराणे चतुर्थे दिवसेतीते पूर्ववत्तां प्रपूज्य च विसृज्य होम मग्निश्च विधिना मानुषी परां उद्वहेदन्यथा नैव पुत्र पौत्रादि वृद्धिमान् नपशून्नच मित्राणि मंगलं नैव गच्छति एवमेव द्विजश्रेष्ट विधिना सम्यगुद्वहेत् धनधान्य समृद्धिश्च इच्छा शक्तिः परत्रचेति अथ प्रयोगः तृतीयोद्वाहात्प्राग्दिन चतुष्टयाधिक व्यवहिते रविवारे शनिवारे हस्त नक्षत्रे शुभ दिनांतरे वा ग्रामात्प्राच्या मुदीच्यां वा पुष्प फल युतार्काधस्तात्स्थंडिलं कृत्वार्क पश्चिमत उपविश्याद्येत्यादि मम तृतीय मानुषी विवाहज दोषा पनुत्त्यर्थं मर्क विवाहं करिष्ये इति गणेश पूजा स्वस्ति वाचन मातृ पूजन वृद्धि श्राद्धाचार्य्य वरणानि कुर्य्यात् तत्र वृद्धि श्राद्धं सुवर्णेन अथाचार्य्येण पूजितो वरः त्रिलोक वासिन् सप्ताश्व छायया सहितो रवे तृतीयोद्वाहजं दोषं निवारय सुखं कुरु इत्यर्कं संप्रार्थ्यार्कं आकृष्णेन रजसा वर्तमानो

निवेशयन्नमृतम्मर्त्यंच हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् इति छायया सहितं रवि मावाह्य श्वेत वस्त्र सूत्राभ्या मावेष्ट्य संपूज्य ओं आपोहिष्टा मयो भुव स्तान ऊर्जे दधानन महेरणाय चक्षसे ओं योवः शिवतमोरसस्तस्य भाजयते हनः उशती रिव मातरः ओं तस्मा अरंग मामवो यस्य क्षयाय ज्विन्वथ आपो जन यथाचनः इत्यभिषिच्य गुडौदन ताम्बूलादि समर्प्य प्रदक्षिणी कुर्वन् मम प्रीति करा येयं मया सृष्टा पुरातनी अर्कजा ब्रह्मणा सृष्टा अस्माकं परि रक्षतु इति पठेत् द्वितीय प्रदक्षिणायांतु नमस्ते मङ्गले देवी नमः सवितु रात्मजे त्राहिमां कृपया देवि पत्नी त्वंमे इहागता अर्क त्वं ब्रह्मणा सृष्टा सर्व प्राणि हितायच वृक्षाणामादि भूतस्त्वं देवानां प्रीति वर्द्धनः तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशय तत आचार्य्येणा द्यत्यादि काश्यप गोत्रा मादित्य पुत्रीं सवितुः पौत्री मर्कस्य प्रपौत्री मिमां अर्क कन्या मित्युक्ते वरः स्वस्ति न इन्द्रो बृद्ध श्रवा इति सूक्तं पठन्नर्कं निरीक्षेत् तत आचार्य्यो विप्रैः सहाशिषो दत्वा ऽमुक गोत्राया मुक शर्म्मणे संप्रददे इत्यर्क कन्यां दत्वा अर्क कन्या मिमां विप्र यथा शक्ति विभूषितां गोत्राय शर्म्मणे तुभ्यं दत्तां विप्र समा श्रयेति पठेत् वरस्तु यज्ञो मे कामः समृध्यता मिति प्रथमां धर्म्मो मे इति द्वितीयां यशोमे तृतीयां इति त्रीनक्षतांजली नर्कोपरि क्षिप्त्वा गायत्र्या परित्वेत्यादिना वा पंचावृता सूत्रेनार्कं मावेष्ट्य तत्सूत्रं पुनः पंच गुणं कृत्वार्कस्य स्कन्धे बध्वा बृहत्सामेति

रक्षां परिकल्प्यार्कस्य दिग्विदिक्ष्वष्टौ कुम्भान् संस्थाप्य वस्त्रेण त्रिसूत्रेण चावेष्ट्य हरिद्रा गन्धाद्यंतः क्षिप्त्वा तेषु नाम्ना महा विष्णु मावाह्य षोडशोपचारैः संपूज्य स्थंडिलेऽग्निं प्रतिष्ठाप्य आघारावाज्येनेत्यंत मुक्त्वाऽऽघारांते ओं संगोभीत्यस्यांगीरसो ऋषिः वृहस्पति र्देवता त्रिष्टुब्छन्दः अर्क विवाह होमे विनियोगः ओं संगोभि रांगिरसो नक्षमाणो भग इवे दर्यमणं निनाय जनेमित्रो न दम्पती अनक्ति वृहस्पते वा जयाशूं रिवाजौ स्वाहा वृहस्पतय इदं नममेति त्यजेत् ओं यस्मैत्वेति अग्निः ऋषिः कामदेवो देवता त्रिष्टुब्छन्दः अर्क० ओं यस्मैत्वा काम कामाय वयं सम्राड्यजा महे तमस्मभ्यं कामं दत्वा प्येदं त्वं घृतं पिब स्वाहा अग्नये इदं० ततो व्यस्त समस्त व्याहृतिभि र्हुत्वा स्विष्ट कृदादि कर्म शेषं समाप्यार्क प्रदक्षिणीं कृत्य मया कृत मिदं कर्म्म स्थावरेण जरायुणा अर्का पत्यानि नोदेहि तत्सर्वं क्षन्तु मर्हसि इति प्रार्थ्याचार्य्याय गोयुग्म मन्येभ्यश्च विप्रेभ्यो यथा शक्ति दक्षिणां दत्वा शांति सूक्तं जप्त्वा पूजोपस्करानाचार्य्याय दत्वा दिन चतुष्ट पर्य्यन्त मग्निं कुम्भांश्च रक्षेत् कुम्भेषु महा विष्णुं पूजयेच्चेति ॥

श्री १०८ सकल शास्त्र प्रवीण गाम्भीर्य्यैश्वर्य्यादि गुण सम्पन्नानां
श्री १०८ पं० गङ्गाधर शास्त्रिणां चरणैक निलयेनोधमपुर
निवासि श्रीपण्डित वीणा प्रपौत्रेण श्री चन्द्रमौल्यात्मजेन
वाल ब्रह्मचारिणा नित्यानन्द शर्म्मणा संगृहीतं
अर्क विवाह विधिः समाप्ति मगात् ॥

श्री गणेशाय नमः ।

अथ देवकोत्थापन मंडपोद्वासन विधिः ।

तत्र कालः समेच दिवसे कुर्याद्देवकोत्थापनं बुधः षष्ठंच विषमं नेष्टं मुक्त्वा पंचम सप्तमौ समेषु षष्ठं विषमेषु पञ्चम सप्तमातिरिक्तं दिनंनात्रेष्ट मित्यर्थः, तत्र कर्ता स्नानं कृत्वा अद्येत्यादि देवकोत्थापनं मण्डपोद्वासनंच करिष्ये इति संकल्पं कृत्वा सर्वाः पूर्वं स्थापिता देवताः प्रत्येकं संपूज्य ओं उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वे महे उप प्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा इति विसर्जयेत् मण्डपोद्वासनं यथाचारं कृत्वा द्विजाशिषो गृह्णीयात् इति देवकोत्थापन मण्डपोद्वासन विधिः ॥

---

*अथ नान्दी श्राद्धानन्तरं धर्म्माः निर्णय दीपेगार्ग्यः, नान्दी श्राद्धे कृते पश्चाद्यावन्मातृका विसर्जनं कुरी श्राद्धं क्षय श्राद्धं स्नानं शीतोदकेन च अपसव्यं स्वधाकारं नित्य श्राद्धं तथैवच ब्रह्म यज्ञं चाध्ययनं नदी सीमाति लंघनं उपवास व्रतं चैव श्राद्ध भोजन मेवच नैव कुर्य्युः सपिण्डाश्च मण्डपोद्वासनावधि, ज्यौतिषे स्नान लचैलं तिल मिश्र कर्म्म प्रेतानुयानं कलश प्रदानं अपूर्व तीर्थामर दर्शनंच विवर्जयेन्मङ्गलतोऽब्दमेकम् पितृणामुद्देशेन कलश दान मित्यर्थः ॥

श्री मतां सकल शास्त्र प्रवीण गाम्भीर्य्यौदार्य्यादि गुण सम्पन्नानां
श्री १०८ पं० गङ्गाधर शास्त्रिणां चरणैक निलयेनोद्यमपुर
निवासि श्रीपण्डित वीणाधरपौत्रेण श्रीचन्द्रमौल्यात्मजेन
बाल ब्रह्मचारिणा नित्यानन्द शर्म्मणा संगृहीतः
देवराज शास्त्रिणा संशोधितंच देवकोत्थापनमण्डपोद्वासनान्तमिदं ग्रन्थं
समाप्ति मगात् ॥

अथ मङ्गलाष्टक प्रारम्भः ।

ॐ श्रीमत्पंकज विष्टरो हरिहरो वायुर्महेन्द्रो निल श्चन्द्रो भास्कर वित्तपाल वरुण प्रेताधिपा वैग्रहाः प्रद्युम्नो नल कूबरः सुरगज श्चिंतामणि कौस्तुभः स्कन्दः शक्तिधरश्च लांगल धरः कुर्वन्तु वो मंगलम् १ गौरी श्रीरदितिश्च कद्रु सुभगा भूतिः सुपर्णा शुभा सावित्री तु सरस्वती वसुमती सत्य व्रता रुन्धती स्वाहा जाम्बवती च रुक्म भगिनी दुःस्वप्न विध्वंसिनी नीला चाम्बु निधेः समीनमकरा कुर्वन्तु वो मंगलम् २ नेत्रानां त्रितयं शिवः पशुपति रग्नि त्रयं पावनं यत्ताद्विष्णु पदत्रयं त्रिभुवने ख्यातंच राम त्रयं गंगावाह पथत्रयं सुविमलं देवत्रयं त्रिस्वरं संध्यानां त्रितयं द्विजै रभिहितं कु० अश्वत्थो वट वृक्ष चन्दन तरू मन्दार कल्पद्रुमौ जम्बू निम्ब कदम्ब चूत सरला वृक्षाश्च ये क्षीरिणः सर्वे ते फल मिश्रिताः प्रतिदिनं विभ्राजिताः सर्वतो रम्यं चैत्र रथं सनन्दन वनं कु० ४ वाल्मीकिः सनकः सनन्दन मुनि र्व्यासो वसिष्ठो भृगुः जाबालि र्जमदग्नि रत्रि जनको गर्गो गिरा गौतमः मन्धाता ऋतुपर्ण वेणु सगरा धन्यो दिलीपो नलः पुण्यो धर्मसुतो ययाति नहुषौ कु० ५ ब्रह्मा वेद पतिः शिवः

म०
१

पशुपतिः सूर्यश्च चक्षुष्पतिः शक्रो देवपति र्यमः पितृपतिः स्कन्दश्च सेना पति यक्षो वित्तपति र्हरिश्च जगतां वायुः पतिः प्राणिना मन्येये पतयोवसंति सततं कुर्वन्तु वो० ६ गंगा सिन्धु सरस्वती च यमुना गोदावरी नर्मदा कावेरी शरयू महेन्द्र तनया चर्मण्वती वेदिका क्षिप्रा वेत्रवती महासुर नदी ख्याताच या गण्डकी पुण्याः पूर्ण जलाः समुद्र सहिताः कु० ७ गंगा गोपति गोमती गणपति गोविन्द गोवर्द्धनौ गीता गोमय गोरजो गिरिसुता गंगाधरो गौतमः गायत्री गरुडो गया गिरिपति र्गम्भीर गोदावरी गन्धर्वौ गृह गोप गोकुल गणाः कु० ८ लक्ष्मी कौस्तुभ पारिजातक सुरा धन्वन्तरिश्चन्द्रमा गावः काम दुघाः सुरेश्वर गजो रम्भादि देवांगनाः अश्वः सप्त मुखो विषं हरिधनुः शंखोमृतं चां बुधे रत्नानीति चतुर्दश प्रतिदिनं कु० ९ इत्येवं वर मङ्गलाष्टक मिदं पापौघ विध्वंसकं पुण्यं सम्प्रति कालिदास कविना बृत्त प्रबन्धी कृतम् यः प्रातः शृणुयात्समाहित मना नित्यं पठेद्भक्तिमान् गंगा सागर संगमे प्रति दिनं स्नानस्य पुण्यं लभेत् एभिर्वर वध्वो शिरासि पुष्प माला समर्पणं कन्या संकल्पो परि टिप्पणी लेख्या ॥

अ०

श्री मतां सकल शास्त्र प्रवीण गाम्भीर्य्यैश्वर्य्यादि गुण सम्पन्नानां
श्री १०८ पं० गङ्गाधर शास्त्रिणां चरणैक निलयेनोधमपुर
निवासि श्रीपण्डित वीणाप्रपौत्रेण श्रीचन्द्रमौल्यात्मजेन
बाल ब्रह्मचारिणा नित्यानन्द शर्म्मणा संगृहीतं
मंगलाष्टकम् समाप्ति मगात् ॥

लग शान्ति दे।

।) पुरोहित गाना
१) बुटना वि. बालक
॥) „ कन्या
१) झीर बालक
॥) „ कन्या
।) तरखान
।) तैख नाई पु.
=) समिधा
=) यज्ञमाला
१) यज्ञान्त बालक पंडित
॥) „ कन्या पंडित
॥) हवन दक्षिणा पुरोहित
) गौदान पंडित
१) टके

सेहरा।

१) पंडित
१) पुरोहित
१) नाई
॥) पुछाकनाई
॥) तमोल पंडित पुरोहित
) माता
) भैन
) भरजाई
१) झीर कुम्भ
=) लरजां प
=) तरखान

पचेकी वधशने दे लग।

॥) पंडित कन्या
॥) नाई „
।) पुरोहित कन्या

पचैको नंदरेडनी।

=) लरजां पंडित बालक
=) पुरोहित बालक
=) नाई बालक

॥) गणेश दक्षिणा

=) पीढा

=) रुट

=) धार

१) मुसानी न्यानी कन्या

॥) वांग्डां न्यानी कन्या

१) न्यानी रकेब कन्या

१) झीर पालकीं ठपने दा

१) वलटोई घार वाली दा

---

१) नाई आरती कन्या

१) पुरोहित आ. कन्या

।) लरजां पंडित कन्या

१) कुंभ झीर

=) अरघ पंडित कन्या

१) गणपति दक्षिणा पंडित कन्या

।) मधुपर्क

१) वर पूजा ग्रन्थि बन्धन पंडित कन्या

१) त्रिपुरुषी षटचार पंडित कन्या

१) त्रिपुरुषी षटचार पंडित बालक

१) कन्या दान के साथ पुरोहित वर

१) कन्या दान प्रतिष्ठा पंडित वर

१) सुवर्ण पंडित बालक

१) गौदान पुरोहित बालक

१) संप्रदान पुरोहित कन्या

।) सरगुंदी न्यानी कन्या

१) लग्न दक्षिणा पंडित दोनों बडी वेद

॥) गणपति दक्षिणा पंडित दोनों

१) कुशांडिक पंडित दोनों

१) अंतर पट पंडित कन्या

॥) गाना पुरोहित दोनों

१) गोत्र वधाई पुरोहित बालक

१) सप्तपदी पंडित बालक

) वाक्य दक्षिणा पुरोहित कन्या

॥) दृढ पुरुष

=) सगुण न्यानी

।) लग न्यानी

१) पिछे बौना न्यानी

=) दुधलसी न्यानी

१) नाई ल. ४ बालक

=) तरखान

१) वेदिदा तरखान

।) चौका झीर

।) वरासूई

॥) दाई

१) नाना गोत्र

१) गुरु दक्षिणा

२) यज्ञांत पंडित दोनों

२) हवन दक्षिणा पुरोहित दोनों

१०० टका भूरि दक्षिणा

चाब

१) पुरोहित बालक

१) नाई ,,

१) झीर ,,